नं० ४८०६

नाम– मन्त्रमहोदधि टीका नौका

कर्त्ता – महीधरः.

पत्र संख्या – २३० पत्राणि सं० ×

विषयः – तन्त्रम्

√

॥अथश्रीमंत्रमहोदधौप्रारंभः॥ ॥

४२०८

श्रीगणेशाय नमः ॥ नत्वा लक्ष्मीपतिं देवं स्वीये मंत्रमहोदधौ । नावं विरचये रम्यां तरणाय गुणैर्युतं ॥ व्य

१ तत्र तावन्महोदधीनामकं तंत्रं चिकीर्षुराचार्यः । शिष्टाचारपरिपालनाय निर्विघ्नग्रंथसमाप्तये स्वेष्टदेवता

नमस्कारनमनपूर्वकं ग्रंथकरणं प्रतिजानीते प्रणम्येति । लक्ष्मीयुतो नृहरिः मध्यमपदलोपी समासः गुरुं श्रीनृसिंहाश्रमं

श्रीगुरुभ्यो नमः । प्रणम्य लक्ष्मीं नृहरिं महागणपतिं गुरुं । तंत्राण्यनेकान्यालोक्य वक्ष्ये मंत्रमहोद

धिं १ प्रातरुत्थाय शिरसि ध्यात्वा गुरुपदांबुजं । आवश्यकं विनिर्वर्त्य स्नातुं यायात्सरित्तटे २ प्रोक्ते

न विधिना स्नात्वा मंत्रस्नानं समाचरेत् । स्मार्त्तसंध्यां मंत्रसंध्यां कृत्वा देवं विचिंतयेत् ३ गृहद्वारम

थागत्य द्वारपूजां समाचरेत् द्वारमस्त्रांबुनाप्रोक्ष्य गणेशं चोर्द्ध्वतो यजेत् महालक्ष्मीं दक्षभागे वामभा

गे सरस्वतीं । पुनर्दक्षे यजेद्विघ्नं गंगां च यमुनामपि । पुनर्वामे क्षेत्रपालं स्वः सिंधुयमुने अपि । पुनर्दक्षे तु

धातारं विधातारं तु वामतः ॥ ६ ॥

मंत्रा एव महान्तः उदकानि धीयंते स्मिन्निति महोदधिर्ग्रंथः । ततः प्रातरादिनं मंत्रिणः कृत्यमाह प्रातरिति शिर

स्थं गुरुपादांबुजगलितामृतधारयामानसंस्नानं कुर्यादित्यादि पूजातरंगे वक्ष्यति । १ । २ । अस्त्रांबुना अ ८

स्त्राय फडित्यभिमंत्रितजलेन ॥ ४ ॥ ५ ॥ ६ ॥

शंखपद्मौ निधी तद्वत् तद्दक्षवामयोः द्वारपालांस्तत्तद्देवतानां वक्ष्यमाणत्वात्॥ १०॥ द्वात्रिंशद्वारं प्रणवं जपन् प्राणं पूरयेत्॥ चतुःषष्टिवारं जपन् कुंभयेत् षोडशवारं जपन् रेचयेदित्यर्थः॥ १०॥ ११॥ मूलाधारात् कुंडलीमु

तद्वन्निधी शंखपद्मौ ततोऽर्च्येद्द्वारपालकान् द्वारपूजां विनिस्तीर्य प्रविश्यार्चनमंदिरं॥ उपविश्यासने नत्वा गणेशं गुरुदेवतां॥ प्राणानायम्य तारेण पूरकुंभकरेचकैः॥ द्वात्रिंशता चतुःषष्ट्या क्रमात् षोडशसंख्यया॥ देवार्चायोग्यताप्राप्त्यै भूतशुद्धिं समाचरेत्॥ १०॥ मूलाधारस्थितां देवीं कुंडलीं परदेवतां॥ विशतंतुनिभां विद्युत्प्रभां ध्यायेत्समाहितः॥ ११॥ मूलाधारात्तु उत्थाप्य सुसंगतां हृदयांबुजे॥ सुषुम्णामार्गमाश्रित्य सादाय जीवं हृदंबुजात्॥ प्रदीपकलिकाकारं ब्रह्मरंध्रगतं स्मरेत्॥ जीवं ब्रह्मणि संयोज्य हंसमंत्रेण साधकः॥ पादादि ब्रह्मरंध्रांतं स्थितं भूतगणं स्मरेत्॥ स्ववर्णबीजाकृतिभिर्युक्तं तद्विधिरुच्यते॥ १२॥ ॥

स्थाप्य हृदो जीवं गृहीत्वा सुषुम्णामार्गेण ब्रह्मरंध्रं नीत्वा ब्रह्मणि स्थापयेदिति गुरूपदेशगम्योऽर्थो योगिनापरिज्ञेयः॥ योगाभावे स्मरणमात्रं विधेयं॥ १२॥ वर्णाः पीतादयः बीजानि लमित्यादीनि॥ आकृतयश्चतुःकोणादयः॥ तद्युक्तं भूतगणं॥ १३॥

तदेव दर्शयति ॥ पादादीति ॥ १४ ॥ पदिति भूमंडले पदिंद्रियं गमनं घ्राणं गंधो ब्रह्मा निवृत्तिः समानः गंतव्यो देशोपि ॥ एवमष्टौ पदार्थाश्चिंत्याः ॥ एवं जलमंडले हस्तग्रहणाद्याश्च रसना रस विष्णु प्रतिष्ठोदानाः ॥ तेजसि पायु विसर्गो विसर्जनी

पादादिजानुपर्यंतं चतुःकोणं सवज्रकं ॥ भूबीजाढ्यं स्वर्णवर्णं स्मरेदवनिमंडलं ॥ १४ ॥ जान्वादानाभि चंद्रार्द्धनिभं पद्मद्वयांकितं ॥ वंबीजयुक्तं श्वेताभं अंभसो मंडलं शुभं ॥ १५ ॥ नाभेर्हृदयपर्यंतं त्रिकोणं स्वस्तिकान्वितं ॥ रंबीजेन युतं रक्तं स्मरेत्पावकमंडलं ॥ १६ ॥ हृदो भ्रूमध्यपर्यंतं वृत्तं षड्बिंदुलांछितं ॥ यंबीजयुक्तं धूम्राभं नभस्वन्मंडलं स्मरेत् ॥ १७ ॥ आब्रह्मरंध्रं भ्रूमध्याद्वृत्तं स्वच्छं मनोहरं ॥ हंबीजयुक्तमाकाशं मंडलं प्रविचिंतयेत् ॥ १८ ॥ पद्हस्तं पायूपस्था वाकू क्रमाद्ध्येया धरादिगाः ॥ स्वकीयविषयैर्युक्ता गमनग्रहणादिभिः ॥ १९ ॥ घ्राणं च रसना चक्षुः स्पर्शनं श्रोत्रमिंद्रियं ॥ क्रमाद्ध्येयं धरादिस्थं गंधादिगुणसंयुतं ॥ २० ॥ ब्रह्मविष्णुशिवेशान सदाशिव इतीरिताः ॥ धरादिभूतसंवेशाद्ध्येयास्तन्मंडलेषु ते ॥ २१ ॥
यच्चक्षुशिवविद्याव्यानाः ॥ वायावुपस्थानंदस्त्री स्पर्श न स्पर्शेशानशांत्यपानाः ॥ नभसि वाकू वक्तव्य वदन श्रोत्र शब्दः सदाशिव शांत्यतीता प्राणाः ॥ १९ ॥ २० २१ ॥ ॥ ॥

यं

२२ २३ २४ २५ २६ २७ २८

॥तर॰१॥ वायुबीजं यं वन्हिबीजं सुधाबीजं वं॥ भूबीजं लं॥ नभोबीजं हं॥ तेन शरीरं सावयवं कुर्यात्॥ न॰ २९। ३०॥ मं॰मं॰॥

॥२॥ ॥२॥

निवृत्तिश्च प्रतिष्ठा च विद्या शांतिश्च तुर्थिकाः॥ शांत्यतीतेति पंचैव कलाध्येयपरां दिगाः॥२२॥ समानोदानव्यानश्चापानप्राणौ च वायवः॥ धरादिमंडलगताः पंच ध्येया यथाक्रमादिमे॥२३॥ एवं भूतानि संचिंत्य प्रत्येकं प्रविलापयेत्॥ भुवं जले जलं वन्हौ वन्हिं वायौ नभस्यमुं॥२४॥ विलाप्य खमहंकारे महत्तत्वेप्यहंकृतिं॥ महांतं प्रकृतौ मायामात्मनि प्रविलापयेत्॥२५॥ शुद्धसंविन्मयो भूत्वा चिंतयेत्पापपुरुषं॥ दक्षकुक्षिस्थितं कृष्णमंगुष्ठपरिमाणकं॥२६॥ विप्रहत्याशिरोयुक्तं कनकस्तेयबाहुकं॥ मदिरापानहृदयं गुरुतल्पकटीयुतं॥२७॥ पापिसंयोगपद्द्वंद्वमुपपातकरोमकं॥ खड्गचर्मधरं दुष्टं त्वधोवक्त्रं सुदुःसहं॥२८॥ वायुबीजं स्मरन्वायुं संपूर्यैनं विशोषयेत्॥ स्वशरीरयुतं मंत्री वन्हिबीजेन निर्दहेत्॥२९॥ कुंभकेन प्रजप्तेन ततः पापनरोद्भवं बहिर्भस्म समुत्सार्य वायुबीजेन रेचयेत्॥३०॥

व सुधाबीजेन देहोत्थं भस्म संप्लावयित्सुधीः॥ भूबीजेन घनीकृत्य भस्म तत्कालवित्सुधीः॥ विशुद्धमुकुराकारं जपन्बीजं विहायसः॥ मूर्द्धादिपादपर्यंतान्यंगानि रचयेत्सुधीः॥३२॥ ॥३१ ३२॥ ॥राम॥ ॥२॥

चितः ब्रह्मणः सकाशात् ॥३३॥३४॥३५ पाशः आं ॥ त्रपा ह्रीं ॥ असुः क्रं संस्थितो प्राणस्थापने ॥३६।३७
कवर्गेतितत्रक ॥

आकाशादीनि भूतानि पुनरुत्पादयेच्चितः सोहं मंत्रेण चात्मानमानयेत् हृदयांबुजे ॥३३ कुंडली
जीवमादाय परमं गा सुधामयं ॥ संस्थाप्य हृदयांभोजे मूलाधारगतां स्मरेत् ॥३४॥ भूतशुद्धिं विधा
येवं प्राणस्थापनमाचरेत् ॥ प्राणप्रतिष्ठामंत्रस्य मुनयो जेशपद्मजाः ॥३५॥ छंदः ऋस्य जुषं साम प्रा
णशक्तिस्तु देवताः ॥ पाशो बीजं त्रपा शक्तिः विनियोगो सुसंस्थितो ॥३६॥ ऋषि नू शिरसि वक्त्रे तु
छंदांसि हृद्दिदेवता ॥ गुह्ये बीजं पदोः शक्तिं न्यस्य कुर्यात् षडंगकं ॥३७॥ कवर्ग नभ आद्यैर्हृत् चश ब्राः
द्यैः शिरः स्मृतं ॥ टक्षौ त्राद्यैः शिखा प्रोक्ता वर्गाद्यैस्तु तनुच्छदं ॥३८॥ यवक्त्र्यादिभिर्नेत्रं मस्त्रयेनांत
रिंद्रियैः ॥ आत्मनैतान्मनून् गान् विन्यसेत् हृदयादिषु ॥३९॥ पंचमं प्रथमं पश्चात् द्वितीयं च च
तुर्थकं ॥ त्रितीयमित्थं क्रमतो वर्गवर्णानुसमुच्चरेत् ॥ यवर्गेप्येवमुच्चार्य नभः श्वेतांतिमो भृगुः ॥ विम
लश्चेति चोच्चार्य क्रमात् वर्णः सबिंदवः ॥ ४१ ॥
मः पंचममिति ॥ ङं कं खं घं गं आकाशवायुतेजोजलपृथिव्यात्मने ॥ हृदयाय नम इत्यादि ॥४०।४१।

न

शक्तिं ह्रीं सृणिं क्रों ॥४५।४६॥ आत्मनेति आत्मनेनम इत्यंतानि त्वगादीनि हृदि न्यसेत् ॥ यादिवर्णपूर्वाणि यंत्व गा[illegible]त्मनेनम इत्यादि सद्यः ॐकारः तदन्वितः आकाशो हः तदाद्यमोजः हौं ओजआत्मनेनमः ॥ खंडः तदादिकं प्रा णं हं प्राणात्म ॥

नभो वाय्वग्निवार्भूमि नभ आदइरिताः ॥ शब्दस्पर्शरूपरसगंधाः शब्दादयो मताः ॥४२॥ श्रोत्रं त्वग्न यनं जिह्वा घ्राणं श्रोत्रादयः स्मृताः ॥ वाक्पाणिपादपायूपस्था वागादयः पुनः ॥४३॥ वक्तव्यादा नगमनविसर्गानंदसंज्ञकाः ॥ तथैव च मनोबुद्ध्यहंकाराश्चित्तसंयुताः ॥४४॥ अंतरिंद्रियसंज्ञाः स्युरेव मुक्तं षडंगकं ॥ नभेरारन्यपादांतं पाशबीजप्रविन्यसेत् ॥४५॥ नाभ्यंतं हृदयाद्भक्तिं दं तं मस्तकान्तं णिं त्वगसृग्मांसमेदोस्थिमज्जाशुक्राणि विन्यसेत् ॥४६॥ आत्मने हृदयांतानि यादिसमादिकान्य पि ॥ ॐ जः सद्यान्विताकाशं पूर्वभागं च खादिकं ॥४७॥ भृग्वादिकं न्यसेत् जीवमेतान्हृदयदेशतः यकाराद्याः आद्यवर्णाः सर्वे स्युश्चंद्रभूषिताः ॥४८॥ ततः समस्तमूलेन मूर्द्धादिचरणावधि ॥ विधाय व्यापकं न्यासं विन्यसेत्पीठदेवताः ॥४९॥

नेमनः ॥४७॥ भृगुः सः तदादिकं जीवं ॥ सजीवात्मनेनमः पादयोर्वर्णाः चंद्रेणानुस्वारेण भूषिता युताः कार्याः ॥४८॥

मंडूकइत्यादि पीठदेवताः सुधासिंधुरित्यत्र विशेषणं वक्ष्यति ॥ ५० ॥ विरागता वैराग्यं ॥ नञादिकाः अ
धर्माय नमः ॥

मंडूकाश्चाथ कालाग्निरुद्र आधारशक्तियुक् कूर्मो धरा सुधासिंधुः श्वेतद्वीप सुराधिपाः
मणिहर्म्यं हेमपीठं धर्मो ज्ञान विरागताः ॥ ऐश्वर्यं धर्मपूर्वास्तु चत्वारस्ते नञादिकाः ॥ ५१ ध
र्मादयः स्मृताः पादाः पीठगात्राणि चेतरे ॥ मध्येनंतस्तत्पद्मं आनंदमयकंदकाः ॥ ५२
संविन्नालं ततः प्रोक्ता विकारमयकेसराः ॥ प्रकृत्यात्मक पत्राणि पंचाशद्वर्णकर्णिकाः ॥ ५३
सूर्येंद्वग्निपावकस्य मंडलत्रितयं ततः ॥ सत्वं रजस्तमः पश्चादात्मायुक्तोत्तरात्मनाः ॥ ५४ पर
मात्माथ ज्ञानात्मा तत्वे माया कलादिके ॥ विद्यातत्वं परं तत्वं कथिता पीठदेवताः ॥ ५५ पूजे
न सर्वदेवानां पीठेताः परिपूजयेत् ॥ न्यासस्थानानि चैतानि शरीरे बहिरर्चनं ॥ ५६ ॥ पूजांतरं
गे वक्ष्यंते सेंद्वाद्यर्णयुताश्च ताः ॥ प्रणाशक्तेस्ततः पूज्या अष्टौ पीठस्य शक्तयः ॥ ५७ ॥ ॥ ७ ॥

त्यादि ५१ ॥ ५२ पीठदेवतानां न्यासस्थानानि बहिर्यागे च पूजास्थानानि एकविंशत्तरंगे वक्ष्यंते ॥ मंडूका
द्याः सेंद्वाद्यवर्णयुताः सानुस्वार प्रथमाक्षर युताः ॥ मंडूकाय नमः इत्यादि ॥ ५६ ॥ ५७ ॥ ७ ७ ॥

हृदयपद्मपत्रेष्वष्टौ ॥ नवमी कर्णिकायां ॥ तारावाह ॥ जयेति ॥ ५८ ॥ पाशादीति ॥ आं ह्रीं क्रों इति पीठमंत्रः ५९ ॥ मं० मं० ५ ॥
६० ॥ ध्यानमा

हृद्यंभोजपत्रेषु नवमी त्वधिकर्णिकां ॥ जयाख्या विजया पश्चादजिता चापराजिता ॥ ५८ ॥ नित्या
विलासिनी दोग्ध्री त्वघोरा मंगलांतिमा पाशादिबीजत्रितयं प्रोक्तं पीठं दिशेत्ततः ॥ ५९ ॥ एवं देहमये
पीठे ध्यायेद्देवीमसुप्रदां ॥ नवयौवनवेगाढ्यां पीवरस्तनशोभितां ॥ ६० ॥ पाशं चापासृक्कपाले सृणीषू
न्भूलह स्तैर्बिभृतीं रक्तवर्णां ॥ रक्तोद्यन्नव्योतरक्तांबुजस्थां देवीं ध्याये तु प्राणशक्तिं त्रिनेत्रां ६१ ॥ अ
ष्टपत्रस्याष्टकोणे ध्यात्वैवं पूजयेत्तु तां ॥ प्राग्रक्षोवायुकोणेषु ब्रह्मविष्णुशिवान्यजेत् ॥ ६२ ॥ अग्नि
वारुणशैवेषु वाणी लक्ष्मी हिमाद्रिजाः ॥ केसरेषु षडंगानि पत्रेष्वष्टौ तु मातरः ॥ ६३ ब्राह्मी माहेश्वरी
चैव कौमारी वैष्णवी तथा ॥ वाराही तु तथेंद्राणी चामुंडा सप्तमी मता ॥ ६४ ॥ अष्टमी तु महालक्ष्मी
प्रोक्ता विश्वमातरः ॥ देवतापूजने चाप्राची मध्यपूजकपूजयोः ॥ ६५ ॥ इंद्रादयः स्वदिक्स्थेव पूजनीया दि
गीश्वराः ॥ इंद्रः कृशानुः कीशो नैनैर्ऋतिर्वरुणोनिलः ॥ ६६ ॥

ध्यानमाह ॥ पाशमिति ॥ षट्हस्ता देवी ॥ पाशं धनुः शूलानि वामहस्तेषु रक्तकपालांकुशबाणानि दक्षेषु
रक्तमयोदन्वान्समुद्रः तत्र पोतो नौः तत्र रक्तं पद्मं स्थितां ॥ ६१ ६२ ५ ॥ इंद्रादयः प्रसिद्धाः स्वदिक्स्थेवान्याः ६६

अन्या वर्णा वक्ष्यमाणाः ६७।७० अजपा हंसः ७२।७५ समार्णमुद्धरति । सबिंदव इति । मेरुसः हंससः आकाशो हः
भृगुसः मायाह्रीं । तारः ॐ प्रणवयुटितः ते न ॐ क्षं सं हं सः ह्रीं ॐ मिति समार्णः ७६।७७ ॥

सोमईशाननामाधोनंतदुर्ध्वे चतुर्मुखः ॥ ततइंद्रादिकाष्टासु पूज्या दिक्पालहेतयः ॥ ७२ ॥ वज्रशक्तिं दंडखड्गो
पाशांकुशगदे अपि ॥ त्रिशूलचक्रपद्मानि दश दिग्पालहेतयः ॥ ७३ ॥ एवमिष्ट्वा महाशक्तिं पंचावरणसं
युतां ध्यायन्हृदि करं धृत्वा पूजयेत्तन्मनुं सुधीः ॥ ७४ ॥ वक्ष्येधुना मनोस्तस्याधारं ध्यातृमुखावहं पाशंमा
यांसृणीं प्रोच्य यादीन् सप्तेंदुसंयुतान् ॥ ७० ॥ तारास्थितं नक्षः समः वर्णानतो जपा ॥ ममप्राणा इह प्राणा
ममजीव इह स्थितः ॥ ७१ ॥ ममसर्वेंद्रियाण्युक्त्वा ममवाङ्मन ईरयेत् । चक्षुःश्रोत्रं घ्राणपादाः प्राणा इहस
मीर्यच ॥ ७२ ॥ आगत्य सुखमुच्चार्य चिरंतिष्ठं त्विदं पठेत् ॥ वह्निजायां च समार्णा मंत्रमेतेषु संवदेत् ॥ ७३ ॥ प्रा
णप्रतिष्ठामंत्रोयं स्मृतः प्राणनिधापने ॥ ममेत्यस्य पदस्यादौ पाशादीनि समुद्धरेत् ॥ ७४ ॥ यंत्रेषु प्रतिमा
दौ वा प्राणस्थापनमाचरेत् ममस्थाने तस्य तस्येष ब्रूंतामभिधां वदेत् ॥ ७५ ॥ सबिंदवो मेरु हंसा काशाः सर्गी भृ
गुः पुनः मायेति तारः रुद्धोयं मंत्रसप्ताक्षरो मतः ॥ ७६ ॥ एवं प्राणान्प्रतिष्ठाप्य मातृकान्यासमाचरेत् ॥ अकारादिक्ष
कारांता वर्णाः प्रोक्तास्तु मातृकाः ॥ ७७ ॥ ॥ ॥

द्या

॥ तरं० १॥ ॥ ५॥

मातृकामाह॥ आकाराद्या इति॥ प्रसिद्धा इत्यर्थः षडंगमाह॥ पंचेति क्लींबाक्षः ॠं ऌं ॡं तद्विनाः सानुस्वारा येद्व ॥ मं० म० ६॥
स्वरदीर्घा तदंतस्थितैः न बिंदुभिः आ तयो हृदयाय नमः इत्याद्यदयः॥ तद्युक्तैः षड्वर्गैः षडंगं॥ अं खं गं घं ङं आं हृदयाय नमः इत्यादि ८०॥

प्रजापतिर्मुनिस्तस्य गायत्रीं छंद ईरितं सरस्वती देवतोक्ता विनियोगो खिलाप्तये ७८॥ हलो बीजानि चोक्ता
नि स्वराशक्तय ईरिताः॥ मूर्द्धि वक्त्रे हृदि न्यस्यादित्यादी नृसाधको नमः ७९॥ पंचवर्गैः कादिभिश्च षडंगानि
समाचरेत्॥ क्लीं बहीनशशांकाद्य ह्रस्वदीर्घान्तरस्थितैः॥ ८०॥ सानुस्वारैर्जातियुक्तैः ध्यायेद्देवीं तनोंबुजे॥ पंचा
शद्वर्णैरचितांगसंगां घटेंदुखंडां कुमुदावदातां॥ वराभये पुस्तकमक्षसूत्रं भजे गिरं संदधतीं त्रिनेत्रां॥ ८१॥
ध्यात्वैवं पूजयेत्सीते देवताः पूर्वमीरिताः॥ पीठशक्तिस्तदुपरि सरस्वत्या न बार्चयेत्॥ ८२॥ मेधा प्रज्ञा प्रभा वि
द्या श्री धृति स्मृति बुद्धयः॥ विद्येश्वरीति संप्रोक्ता मातृकापीठशक्तयः॥ ८३॥ वियत् भृगुस्थं मनुयुग्विस
र्गाद्यं च मातृकाः॥ योगपीठाय नस्त्वंतो मनुराशनदेशने॥ ८४॥

॥ राम॥

ध्यानमाह॥ पंचाशदिति वर्णैरंगरचना न्यासा तु बोध्याः वराक्षस्रजो दक्षयोः पुस्तकाभये वामयोः गिरं सरस्वतीं ८१ ॥ ५॥
पूर्व॥ मीरिताः मंडकाद्याः॥ ८२ ८३ आसनमंत्रमाह॥ वियदिति॥ वियत् हः भृगुः सः मनुरौ झ्यैः ह्सौः मातृकयोगपीठायन
॥ मं० ८४॥

२५६॥९१ हृदादीनि करपादोदरमुखेषु संबध्यते ९२॥९३ स्थितिन्यासध्यानमाह॥ मृगेति॥ मृगविधे वामयोः

मूर्त्तिसंकल्प्य मूलेन तस्यां वर्णान्प्रपूजयेत्॥ आ॥ वंगानि संपूज्यद्वितीये पूजये स्वरैः ॥९५ ह्रौं ह्रौं तृतीये वर्गाश्च वर्गशक्तिं च तुर्थके॥ व्यापिनी पालिनी चापि पावनी क्लेदिनी पुनः ९६ धारिणी मालिनी पश्चाद्धस्तिनी शांखिनी तथा वर्गशक्तयइत्युक्ताः पंचमे लक्ष्मातरः॥ ९७ षष्टे शक्रादयो देवाः सप्तमे वज्रपूर्वकाः॥ इत्थं संपूज्य देवेशीं न्यसेद्वर्णान्निजांगके॥ ९८ ललाटे मुखवृत्ते क्षिश्रवोनासा सुगंडयोः॥ उष्टयोर्दंतपंक्त्योश्च मूर्द्धिवक्त्रे न्यसेत्स्वरान्॥ ९९ बाह्वोः संधिषु चाग्रेषु कचवर्गौ न्यसेत्सुधीः॥ टतवर्गौ पदोस्तद्वत्पार्श्वयोः पृष्टदेशतः॥ १० नाभौ कुक्षौ पवर्गं च हृदयं सं ककुदं सतः॥ न्यस्य यादि च तुर्वर्णान् षादिषट्कं ततो न्यसेत्॥ ११ हृदादि करयोरंध्योर्जठरे वदने तथा॥ सृष्टिन्यासं विधायैवं स्थितिन्यासं समाचरेत्॥ १२ ऋषिश्छंदस्तु पूर्वोक्तं देवता विश्वपालिनी॥ उपक्लिष्टां वल्लभांके ध्यायेद्देवीं समनन्यधीः॥ १३ मृगबालं वरं विद्यामक्षसूत्रं दधत्करैः॥ माला विद्या लसद्धस्ता वहन्त्येया शिवो गिरिं॥ १४ एवं ध्यात्वा रकाराद्यान् वर्णान्यंगेषु विन्यसेत्॥ गुल्फादि जानुपर्यंतं स्थिति

देसमामाला विद्ये दक्षवामयोः॥ १४ संहारन्यासध्यानमाह॥ अक्षेति॥ मृगविद्यं वामयोः॥ अक्षटंकौ दक्षयोः टंकः परशुः ९५॥

(margin) हृदादिषु विन्यस्य

९८ नत्यंतानमस्कारसंपुटाः ॐ अं ॐ इत्यादि ९९।१००।१२३ दीपस्थानमाह नवधेति जपस्थानभूमिं नवधा कृत्वा पूर्वादिकोष्ठेषु कचटतप यशवर्णानुक्षस इत्यष्टमो विलिख्य तं कोष्ठमपि नवधा विधाय तत्र पूर्वादिषु स्वरद्वंद्वं क्षेत्रनामादिवर्णो यत्र कोष्ठे तद्दीपस्थानं सिद्धिदं ४५ ॥ ॥ ॥

6

न्यासे संहारसंज्ञे तु ऋषिछंदस्त्वपूर्ववत् संहारिणी सपत्नानां शारदा देवता स्मृता ॥९६॥ अक्षस्रक् टंकसारंगविद्याहस्तां त्रिलोचनां ॥ चंद्रमौलिं कुचानम्रां रक्तावस्थां गिरिं भजे ९७ ॥ ध्यात्वैवं विन्यसेद्वर्णान् क्षाद्यंतं तद्विलोमतः ॥ सृष्टिन्यासं तु सर्गांतो सर्गविद्धं तिका स्थितौ ॥९८॥ विद्यं तासंहृतौ चैषा पूर्ववच्चांगपूजने न्यस्याः सर्वत्र नत्यंता वर्णा वा तारसंपुटा ॥९९॥ सृष्टिन्यासं स्थितिन्यासं पुनः कुर्यात्प्रयत्नतः अंत्येतु मातृकान्यासाः कार्याः पूजांतरंगको ॥१००॥ मंत्रस्नानादिविधयो गाद्यास्तंत्रे वतेमया ॥ भारतीं सवमाराध्य भजे दिष्टान्मनून् सुधीः १ ॥ विष्णुं शिवो गणेशार्को दुर्गा यं चैव देवताः ॥ आराध्याः सिद्धिकामेन तत्तन्मंत्रैर्यथोदिते २ ॥ आदौ देवं वशीकर्तुं पुरश्चरणमाचरेत् ॥ तीर्थादौ निर्जने स्थाने भूमिग्रहणपूर्वकं ९३ नवधा तां धरां कृत्वा पूर्वादिषु समालिखेत् ॥ कोष्ठे तु सप्तवर्गांश्च लक्षो मध्ये तथा स्वरान् ४ क्षेत्रनामादिमो वर्णो यत्र कोष्ठे भवेत्ततः ॥ उपविश्य जपं कुर्यात् नान्यस्मिन् दुःखदस्थले ॥५॥ ॥

रवे ॥राम॥ ॥६॥

पुरश्चरणधर्मानाह ॥ आमध्यान्हमिति ॥ उपांशुशनैः वर्णोच्चारणं ॥ मानसं मनसैव त्रिःस्नायी त्रिःस्नानशीलः ६ अन्येद्युः

थ

आमध्यान्हं जपं कुर्यात् उपांशुर्वा मानसः ॥ हविष्यं निशि भुंजीत त्रिःस्नायी भ्रमवर्जितः ॥ ६ ॥ व्यग्रता तस्य निष्ठी
वं क्रोधयादप्रसारणं ॥ अन्यभाषां त्यजेत्क्षेवं जपकाले त्यजेत्सुधीः ॥ ७ ॥ स्त्रीशूद्रभाषणं निद्रां तांबूलशयनं
स्त्रिया ॥ प्रतिग्रहं नृत्यगीते कौटिल्यं वर्जयेत्सदा ॥ ८ ॥ भूशय्या ब्रह्मचर्यं च त्रिकालं देवतार्चनं नैमित्तिका
र्चनं देवस्तुतिविश्वासमाश्रयेत् ॥ ९ ॥ प्रत्यहं च जपेत्तावन्नैव न्यूनाधिकं क्वचित् ॥ एवं जपं समाप्यांते दशां
शं होममाचरेत् ॥ १० ॥ तत्तत्कल्पादितद्द्रव्यैस्तद्विधानमुदीर्यते ॥ प्राणायामं षडंगं च कृत्वा मूलेन मंत्रवि
त् ॥ ११ ॥ कुंडे वा स्थंडिले कुर्यात् संस्काराणां चतुष्टयं मूलेनेक्षणमस्त्रेण प्रोक्षणं ताडनं कुशैः ॥ १२ ॥ वर्मणाभ्यु
क्ष्य मासिंच्य लिखेद्यंत्रं तदंतरे ॥ वन्हिकोणषट्कस्याष्टदलं भूमंदिरात्मकं ॥ १३ ॥ मध्ये तु भारतीं मायां लि
खित्वा पीठमर्चयेत् ॥ मंडूकात्परतत्त्वांतं पीठशक्तीर्जयादिकाः ॥ १४ ॥ वागीशावाणीश्वरयोर्योगपीठात्म
नेनमः मायादिकः पीठमंत्रस्तयोस्तेनासनं दिशेत् ॥ १५ ॥ ॥ ॥ ॥ ॥ ॥

य्य

र्म

संभाषणमन्यभाषा ॥ अंत्यजानामीक्षणं दर्शनं त्यजेत् ७ ॥ १० होमविधिमाह प्राणायाममिति अस्त्रेण फडिति
अस्त्रमंत्रेण ॥ १२ ॥ वर्मणा हुंकारेण ॥ भूमंदिरं चतुःकोणं ॥ १३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥नरं०१॥ क्रव्यादांशं मांसाशिनो वह्नयस्तत्रस्थं अस्त्रेण संत्यजेत् १८ १९ वह्निबीजात् रमिति बीजात् २० सुधया वं बीजेन धे ॥ मं०म०१८॥

॥७॥

यजेत्तौ तारमायाभ्यां गंधाद्यैरुपचारकैः॥ लक्ष्मीनारायणौ त्वं च द्वैष्यावे होमकर्मणि॥ १६ सूर्यकां

॥तात्स्वणितः श्रोत्रियागारतोऽपिवा पात्रेणपिहितं पात्रे वह्निमानाययेत्ततः॥ अस्त्रेणारायतस्पात्रं

वर्मणोद्घाटयेच्चुतं अस्त्रमंत्रेणानेक्रव्यांशं व्यादांशं ततस्त्यजेत्॥ १७ मूलेनपूरतोघ्नत्वासंस्कारांश्चतुरश्च

रेत् वीक्षणाद्यानुपुराप्रोक्ता नाड्यप्रोक्षणमाचरेत्॥ १८ परमात्मानले नाथजाठरेणापि वह्निना॥ स्मरन्ने

कं वह्निबीजाचैतन्यं योजयेत्ततः॥ १९ तारेणचापि मंत्राग्निं सुधयाधेनुमुद्रया॥ अमृतीकृत्य संरक्षेद

स्त्रमंत्रेण मंत्रवित्॥ २० मुद्रयात्ववगुंठिन्याकवचेनावगुंठयेत् कुंडोपरि ततो वह्निं भ्रामयेत्त्रिर्ध्रुवं पठेत्

॥२२ शय्यांस्थितामृतुस्नातां नीलेंदिवरधारिणीं॥ देवेनयुज्यमानां तां स्मृत्वा तद्योनिमंडले॥ २३ ईश्वरेतो

धियावह्निं स्थापयेदात्मसंमुखं॥ मूलं नवार्णांचपठन्नूजानुस्पृष्टधरातलः॥ २४ ॥ ॥ ॥ ॥

॥राम॥

॥७॥

नुमुद्रालक्षणं वक्ष्यते॥ २१॥ अवगुंठिन्या अत्र वक्ष्यते॥ कवचेन हूं बीजेन॥ ध्रुवं प्रणवं ॥ २२ २३ २४॥

नवार्णमुद्धरति॥ अर्घे १ शेऊ गगनं हः शेषं स्वरूपं हृदयांतो नमोंतः तेन हुं वह्निचै तन्याय नमइत्य॥ ९ ग्निस्थापनेनवा
क्षरो मंत्रः॥ २५ विश्वाण्यदत्ता॥ २६॥ चतुर्विंशतिमुद्धरति॥ चिदिति॥ चित्पिंगल हन २ दह २ पच २ सुर्वज्ञाज्ञापयस्वाहा

रेफार्घ शेंदुसंयुक्तं गगनं वह्निचैततः॥ तन्याय हृदायांतो यं नवर्णोग्निनिधापने॥ २५॥ विश्वाण्याचमनं देवीं
देवयोर्ज्वालयेद्वसुः॥ चतुर्विंशतिवर्णेन मंत्रेणाश्वयणादिभिः॥ २६॥ चित्पिंगल हनं द्वंद्वं दह युग्मं पच द्वयं
सर्वज्ञाज्ञापयस्वाहा मंत्रो वेदभुजाक्षरः॥ २७॥ प्रदर्श्य ज्वालिनीमुद्रामुत्थायविहितांजलिः॥ श्लोकरूपेण मंत्रे
णोपातिष्ठेत हुताशनं॥ २८॥ अग्निं प्रज्वलितं वंदे जातवेदं हुताशनं सुवर्णवर्णममलं समिद्धं विश्वतोमु
खं॥ २९॥ अथाग्निमंत्रं विन्यसेत् तद्विधानमुदीर्यते॥ वैश्वानरां तेजातेति वेदांते स्यादिहावह॥ ३०॥ लोहि
ताक्षपदांत सर्वकर्माण्यंते तु साधय॥ वह्निप्रियांतो मंत्रोयं षट्त्रिंशत्यक्षरान्वितः॥ ३१॥ ऋषिः छंदो देव
तास्य भृगुर्गायत्रीपावकाः॥ रंबीजं वह्नयं शक्तिर्होहवने विनियोजनं॥ ३२॥ ॥ ॥ ॥ ॥

वेदभुजाक्षरश्चतुर्विंशति वर्णाः॥ २७॥ ज्वालिनीमुद्रा लक्षणमाह॥ मणिबंधयुतौ कृत्वा प्रसृतांगुलिकौ करौ कनि
ष्ठांगुष्ठयुगले मिलित्वांतः प्रसारिते॥ ज्वालिनी नाम मुद्रेयं वैश्वानरप्रियंकरा इति॥ २८॥ श्लोकरूपमाह अ
ग्निमिति २९ वैश्वानरजातवेद इहावह लोहिताक्ष सर्वकर्माणि साधय स्वाहेति॥ ३०॥ हृदयं॥ ३२॥ ॥

ङे॰ताश्चतुर्थ्यंता॥२३ २४ बीजानुद्धरति दीपिकेति॥दीपिकाऊअनलोरःवायुर्यःएतेषुस्थिताःसकाराद्याविलोमवर्णाः२५

शषशावलरयेति सेंदवोनुस्वाराद्याः॥इमेसप्तहिरण्यादिजिह्वाबीजानीत्यर्थः॥ततश्चस्यूंहिरण्यायैनमः॥षलुंगगना

लिंगेपायौमूर्द्धिवक्त्रेनसिनेत्रेखिलांगके वन्हिजिह्वास्वबीजाद्यान्यसेत्ङेंतानमोन्विताः॥२३॥हिरण्यागगनारक्ताकृष्णासुप्रभयान्विताः बहुरूपेतिरक्तेतिजिह्वासप्तवसोर्मताः॥२४ दीपिकानलवायुस्थाःसाद्यावर्णाविलोमतः॥सेंदवःसप्तजिह्वानांसप्तानांबीजतांगताः॥२५॥गीर्वाणपितृगंधर्वयक्षनागपिशाचकाःराक्षसाश्चेतिजिह्वानांदेवतास्तत्स्थलेन्यसेत्॥२६ सहस्रार्चिषेहृदयंस्वस्तिपूर्णायमस्तके॥उत्तिष्ठपुरुषायेतिशिखामंत्रोयमीरितः॥२७॥धूमांतव्यापिनेवर्मसप्तजिह्वायनेत्रकं॥अस्त्रंधनुर्द्धरायेतिषडंगानिसमाचरेत्॥२८॥मूर्द्धिवामांसकेपार्श्वेकटौलिंगेकटौपुनः॥दक्षेपार्श्वेसकेन्यस्येन्मूर्त्तिरष्टौविभावसोः॥२९॥तारग्नयेपदाद्यास्ताश्चतुर्थिहृदयांतिकाः जातवेदांतिकाःसप्तजिह्वोवैहव्यवाहनः॥४०॥ ॥ ॥

येनमः॥र्ष्यूंकृष्णायैनमः॥र्य्यूंसुप्रभायैनमः॥रन्यूंबहुरूपायैनमः॥र्ब्यूंअतिरक्तायैनमः॥गीर्वाणादयोजिह्वाधिदेवताजिह्वास्थानेन्यस्याः सुरेभ्योनमः॥लिंगेइत्यादिप्रयोगः॥२६॥मस्तेतिशिरोमंत्रः२७॥तारेतिप्रणवः अग्नयेपदपूर्वाङे॰तानमोंताः॥ॐअ

सप्तजिह्वात्मकेकृशानेस्वाहा॥४०॥

हाटकरे तसः वन्हेः वन्हिमंडलपर्यंतमेवं पीठदेवता पूज्याः ॥ ४२ ततः पीठाद्याः ॥ पीठशक्तयः ४३ बीजमिमितिरंवह्ना

अम्भोदरसंज्ञो न्यस्येत् तथा वैश्वानराह्वयः ॥ कौमारतेजाः स्याद्दिव्यसुखं देवमुखावपि ॥ ४१ ततो न्यसेन्निजे देहे
पीठं हाटकरे तसः ॥ वन्हिमंडलपर्यंतं मंडूकादि यथाविधि ॥ ४२ पीताश्वेतारुणा कृष्णा धूम्रा तीव्रा स्फुलिंगिनी
रुचिरा ज्वालिनी चेति कृशानोः पीठशक्तयः ॥ ४३ बीजं वन्ह्यासनायेति हृदंतं पीठमंत्रकः ॥ एवं विन्यस्य पीठांतं पा
वकं चिंतयेत्ततः ॥ ४४ त्रिनेत्रमारक्ततनुं सुरक्तवस्त्रं सुवर्णाब्जमग्निपीठे वराभयेः स्वस्तिकशक्तिहस्तं पद्म
स्थमाकल्पसमूहयुक्तं ॥ ४५ एवं ध्यात्वा चेनं कुर्यान्मासेनं विधिवद्बुधः ॥ परिषिंचेत्ततः स्तोयैः कुंडस्थं स्थंडिलमेव
वा ॥ ४६ दर्भैः परिस्तरेदग्निं प्रागग्रैरुदगग्रकैः ॥ प्रत्यग्दक्षिणसौम्यासु न्यसेन्नीन् परिधीन् क्रमात् ॥ ४७ पालाशान्वि
ल्वजांस्तेषु ब्रह्मविष्णुशिवान्न्यसेत् ॥ वन्हौ न तौ पीठमभ्यर्च्य वाहयेत्स्वहृदो नलं ॥ ४८ गंधादिभिः समभ्यर्च्य पूजयेत्ता
वकारती ॥ षट्सु कोणेषु मध्ये च जिह्वास्तद्देवता यजेत् ॥ ४९ केसरेष्वंगपूजा स्यां दले स्वष्टसु मूर्तयः ॥ मातरो
ह्यष्टदलांतेषु भैरवाः स्युस्ततस्ततः ॥ ५० धरापुरे तु शक्राद्याः वज्राद्यायुधसंयुताः ॥ एवमावरणैर्युक्तं सप्तजिह्वा

सनायनमइति पीठमंत्रः ॥ ४४ ध्यानमाह त्रिनेत्रमिति ॥ वरस्वस्तिकौ दक्षयोः ॥ अभीति शक्ती वामयोः ॥ आकल्पमारभ्यतसंयुतं ४५ ॥ ५१

भैरवानाह॥ असितांगइति ५२ ५५ तीर्थमंत्रेण गंगेचयमुनेचैवगोदावरिसरस्वति॥ नर्मदेसिंधुकावेरीजलेस्मिन्संनि ॥ मं० मं० ॥
धिंकुरु इत्यनेनस्पृष्ट्वांकुशमुद्रया॥ ऋज्वीं मध्यमिकांकृत्वा तर्जनीमध्यपर्वणी॥ संयोज्याकुंचयेत्किंचित्मुद्रैषांकुश

अ

असितांगोरुरुश्चंडः क्रोधउन्मत्तसंज्ञकः कपालीभीषणश्चापि संहारश्चाष्टभैरवाः॥ ५२॥ वामेकुशानथास्त्रीर्यं
तत्रवस्तुविनिक्षिपेत् पर्णाताप्रोक्षणीपात्रेआज्यस्थालीस्रुचंस्रुवं॥ ५३॥ अधोमुखानिचैतानिहोमद्रव्यं

१

घृतंकुशान्॥ समिद्धः पंचपालाशीरन्यदप्युपयोगिवत्॥ ५४॥ कृत्वापवित्रेमूलेनप्रोक्षितानिशुभानिभासा॥ उत्ता
नानिविधायाथप्रणितांपूरयेत्जलैः॥ ५५ तीर्थमंत्रेणतीर्थानिस्पृष्ट्वातत्राह्वयेत्सुधीः॥ पवित्रेअक्षतांस्त
त्रनिक्षिप्योत्पवनंचरेत्॥ ५६॥ अथोदीच्यानिधायैतांप्रोक्षण्यांतंडुलंक्षिपेत्॥ हवनीयंद्रव्यजातंप्रोक्षेत्तो
यैःपवित्रगैः॥ ५७ मूलेनमूलगा॥ यच्चायद्वाहृदयमंत्रतः दक्षिणेपीठमासाद्यतत्रब्राह्मणमाह्वयेत्॥ ५८॥
अणिमाद्याःसिद्धयोष्टौब्रह्मणःपीठदेवताः॥ तारहृत्पूर्वकोङेंतांब्रह्मामंत्रोस्यपूजने॥ ५९॥ हस्ताभ्यांस्रुक्
स्रुचौधृत्वातापयेत्त्रिरधोमुखौ॥ वामहस्तेनतौधृत्वादर्भैर्दक्षिणमार्जयेत्॥ ६०॥ ॥ ॥ ॥ राम ॥

॥ १ ॥

संज्ञितेनितलक्षणं॥ ५६ ५८॥ अणिमाद्याअष्टमेवक्ष्यते॥ ब्रह्ममंत्रमुद्धरति॥ तारेति॥ ॐ नमोब्रह्मणेइति॥ ५९ ६०॥

शक्तित्रयमाह इत्येति दीर्घत्रयं आईऊ। द्यामहः तत्पूर्वकं ह्रां इच्छाशक्त्यै नमः मूले। ह्रीं ज्ञानशक्त्यै नमः मध्ये ह्रूं क्रि

संप्रोक्ष्य प्रोक्षणीतोयैः मता प्यपूर्ववस्तुनः न्यस्याग्नो मार्जयेद्दर्भास्ता योः शक्तित्रयं न्यसेत्। ६४ इच्छाज्ञा

नक्रिया संज्ञा चतुर्थी नमसान्विताः। दीर्घत्रयं दयुग्म्यो मपूर्वकं स्थानकत्रये। ६२। त्वदग्रविन्यसेच्छक्तिं स्रु

वे चानुं तः स्रुवे सूत्रयर्योनसं संपूज्य कुसुमादिभिः। ६३। कुशोपरि न्यसेत् दक्षे तयोः संस्कार इरितः

अस्त्रो क्षिलायामाज्यस्यस्थाल्यामाज्यं विनिक्षिपेत्। ६४। वीक्षणादिक संस्कारा संस्कृतं मूलमंत्रितं। गोमू

त्रयामृतीकृत्य षट्संस्कारांस्तत अथरेत्। ६५। कुंडोध्र्वतेवायुकोणास्थितेंगारे विनिक्षिपेत्। रदेतिताप

नं प्रोक्तं दर्भयुग्मप्रदीपितं। ६६। आज्ये क्षिप्त्वा इदाव ह्नोपवित्रे करणो क्षिपेत्। आज्यं निराजयेद्दीप्तदर्भ

युग्मे नवर्मणा। ६७। अभिद्योतनमुक्तं ततू दीप्तं दर्भत्रयं स्थते। दर्शयेदस्त्रमंत्रेणाद्योतितां घृतपात्रिकां

६८ संयोज्याग्नौ तदंगारानू सलिले संस्पृशेत् सुधी। अंगुष्ठानामिकाभ्यां तु दर्भानादाय निक्षिपेत्। ६९

त्रिरग्निंमूलं खं कृत्वा अस्त्रेणोत्पवनं त्विदं हृदात्मसंमुखं तद्दाज्येक्षेपस्तु संप्लवः। निराजनादि संस्का

रैरग्नौ दर्भान् विनिक्षिपेत्। ७०। याशक्त्यै नमः अंते ६८। गोमुद्राधेनुमुद्रा ६५-८। ६९। ७०। ॥

॥ ॥ ॥ ॥ ॥ ॥

त

वे थ्य

सं

॥तरं० १॥ नाडीत्रयंइडापिंगलासुषुम्नाख्यं तृतीयामध्येचिंत्या॥ ७३॥ इदानमइतिमंत्रेण॥ अग्नयेस्वाहेतिदक्षनेत्रे सोमा ॥मं० म०॥

॥ १० ॥ यस्वाहेतिवामे॥ ७४॥ तदाहुतिचतुष्टयेन अग्नेर्नेत्रमुखप्रकाशोभवतिइत्यर्थः॥ ७४॥ ५ ॐ अस्याग्नेर्गर्भाधानंसंस्कारंकरोमिस्वाहे

दर्भद्वयंग्रंथियुतंघृतमध्येविनिक्षिपेत्॥ वामदक्षिणयोः पक्षोस्मृत्वा नाडीत्रयंस्मरेत्॥ ७६॥ दक्षिणाद्वामतो मध्या

द्धृदादायघृतंसुधीः॥ अग्नयेग्नि प्रियातद्वत्सोमायेति पुनस्ततः॥ ७७॥ जुहुयादग्निषोमाभ्यां स्वाहेत्यक्षि

तृतीयके पात्रयेदाहुतेः शेषमाहुतिग्रहणस्थले॥ ७८॥ भूयोहृदादक्षभागादादायाज्यंमुखेयजेत् अग्नये

स्विष्टकृतेन नेत्रस्योद्घाटनंमतं॥ ७९॥ महाव्याहृतिभिर्व्यस्तसमस्ताभिश्चतुष्टयं॥ आहुतीनांत्रयं व

न्हि मंत्रेणैव ततश्चरेत्॥ ८०॥ घृताहुतीभिरष्टाभिरेकैकांसंस्कृतिंचरेत्॥ ॐ अस्याग्नेःपुंसंस्कारंकरो

म्यग्निवल्लभा॥ ८१॥ इत्थमनुजपन्गर्भाधानंपुंसवनंततः॥ सीमंतोन्नयनंकार्यंकर्मकृत्वाततश्चरेत्॥ ८२॥

वन्हेःपंचसमिद्धोमाज्ञापनयनंवसोः॥ कुर्याद्देवाभिधानेन पूर्ववत्नामपुष्पणाः॥ ८३॥ नामानंतरमेतस्या ॥राम॥

पितरौ स्वर्पयेत् हृदि॥ अन्नप्राशंतु चौलोपनयनंदारयोजनं ७९ ॥ ॥ ॥ ॥ १० ॥

त्यादि॥ ७६॥ पंचमसिद्धोमाद्दसौ रग्नेराज्ञापनयनाख्यः संस्कारः देवाभिधानेन नाम्नापुष्पणा ग्नेर्नामपूर्ववत् घृताहुत्यष्ट केनकुर्यात् शुद्धाग्निरित्यादि॥ ७८॥ एतस्याग्नेपितरौवागीशीवागीशौकुंडात्स्वहृदिन्यसेत् उपनयनंउपवीतं दारयोजनंविवाहं ॥ ७९ ॥

८१ सुमं पुष्पं ॥ ८२ दशधा व्यस्तेन विक्तेन ॥ ८३ तमेव विभागमाह ॥ पूर्वेति बीजषट्कं बाणाः पंच वर्णाः सायकाः पंचै
व मुनयः सप्त ॥ मार्गणाः पंच ॥ ८५ गणेशमंत्रमाह ॥ तारमिति तारः ॐ लक्ष्मीः श्रीं गिरिसुता ह्रीं कामः क्लीं भूः ग्लौं गणनायकः

संस्काराः स्युर्विवाहांता मृत्स्यंताः क्रूरकर्मणि ॥ एकैकामाहुतिं हूयात् वन्हेर्जिह्वागमूर्तिभिः
इंद्रादिभिश्च वज्राद्यैर्विधांतैर्जुहुयात्ततः स्रुवेणाज्यं चतुर्वारं निधाय स्रुचि तं सुधीः ॥ ८२ ॥
अपिधाय स्रुवेणैतां गृह्णीयात्करयुग्मतः ॥ तिष्ठन्मूलं तयो नाभौ रुत्वाग्नौ निक्षिपेत्सुमं ॥ ८२
वामस्तनांतं तन्मूलं ध्यत्वाग्निमनुनासुधीः ॥ जुहुयाद्द्वौ षडंतेन संपत्त्यर्थमतं द्वितः ॥ ८३ ॥ महा
गणेशमंत्रेण व्यस्तेन दशधा ततः जुहुयाच्च सम्मनोः स्मृतः ॥ ८५ ॥ तारो लक्ष्मीः गिरिसुता का
मो भूर्गणनायकः ॥ चतुर्थ्यंतो गणपतिर्वरांते वरदेति च ॥ ८६ ॥ सर्वांतेजनमित्युक्त्वामेवशांते तु
मानयः ॥ स्वाहांतो वसुयुग्मार्णो महागणपतेर्मनुः ॥ ८७ ॥ ॥ ॥ ॥ ॥

गं इति बीजषट्कं ॥ गणपतये वरवरद सर्वजनं मे वशमानय स्वाहेति ॥ विभागाः ॥ पूर्वपूर्वयुताः कार्याः ॥ ॐ ॐ
श्रीं ॥ ॐ श्रीं ह्रीं मित्यादि ॥ ८७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मस्तेन चतुर्वारं घृताहुतिं ८४ पूर्वपूर्वयुता बीजषट्कं, बाणाश्च सायकाः मुनयो मार्गणाश्चेति विभागास्त ८

एवं कृत्वाग्निसंस्कारं पीठदेवस्य पूजयेत् ॥ तत्रेष्टदेवमावाह्य मुद्रा आवाहनादिकाः ॥२८॥
प्रदर्श्य वन्हिरूपस्य देवस्य वदने पुनः ॥ मूलेन जुहुयात्पंचनेत्रसंख्याघृताहुतीः ॥१९॥ वन्ह्ये
कीकरणं तद्देवस्तेनैव ज्ञायते नाडीसंधानसिध्यर्थं वन्हिदेवतयोस्ततः ॥१०॥ जुहुयात्तु मूल
मंत्रेण रुद्र संख्याघृताहुती इष्टदेवस्य तु मिंतामेकैकाहुतिराचरेत् ॥११॥ ततस्तु मूलमंत्रेण
दशधा जुहुयात्घृतं तत्तत्कल्पोक्तद्रव्येण दशांशं जुहुयाज्जपात् ॥१२॥ होमं समाप्य कुर्वीत
पूर्णाहुतिमनन्यधीः ॥ होमावशिष्टेनाज्येन पूरयित्वा स्रुसंसुधीः ॥१३॥ पुष्पं फलं निधायाग्रे
स्रुवेणाच्छाद्य तं पुनः ॥ उत्थितो वौषडंतेन मूलेन जुहुयाद्धसौ ॥१४॥ ततश्चाप्यारतीनां तु जु
हुयाद्वारत्तिं पृथक् ॥ देवं विसृज्य स्वहृदि वन्हेर्जिव्हांगमूर्त्तिभिः ॥१५॥ जुहुयाद्व्याहृतीं हुत्वा
ग्रोक्षेत्तं प्रोक्षणीजलैः ॥ संप्रार्थ्यानेन मनुना नत्वा नं विसर्जेत् हृदि ॥१६॥ भो भो वन्हे महा
शक्ते सर्वकर्मप्रसाधक ॥ कर्मांतरेपि संप्राप्ते सान्निध्यं कुरु सादरं ॥१७॥ ॥ ॥ ॥

तर्पणमंत्रमाह॥ मूलमंत्रांते कृष्णं तर्पयामि नमः इति तर्पणे॥ कृष्णमभिषिंचामीत्यभिषेकः॥ जपादशांशाद्धोमः त-
द्दशांशेन तर्पणं॥ तद्दशांशेनाभिषेकः॥ [illegible]॥ तद्दशांशेन विप्रभोजनं इति पंचांगपुरश्चरणमिति॥

एवं होमं समाप्याथ तर्पयेद्देवतां जलैः आवाह्य तद्दशांशेन तर्पणादभिषेचनं॥ १८॥ तर्पयामि
नमस्त्वेति हि द्वितीयां तेष्टपूर्वकं मूलांते तु पदं देयं सिंचामीत्यभिषेचने॥ १९॥ ततो नानाविधै रत्नै-
स्तर्पयेत्तु द्विजसत्तमान्॥ हृष्टरूपान् समाराध्य तेभ्यो दद्याच्च दक्षिणाः॥ २०॥ न्यूनं संपूर्णतामेति
ब्राह्मणाराधानात्तृणां॥ देवताश्च प्रसीदंति संपद्यंते मनोरथाः॥ २१॥ इति श्रीमन्महीधरविर-
चिते मंत्रमहोदधौ भूतशुद्ध्यादिकथनं नाम प्रथमस्तरंगः॥ १॥

कनीयान्पक्षः॥ अभिषेकवर्ज्यो मध्यमः तर्पणाभिषेकवर्ज्यः त्र्यंगः उत्तमः पक्षः होमदशांशद्विजभोजनमिति।
किं बहुना बहुब्राह्मणभोजनेन देवताप्रसादो भवेदिति॥ १९॥ २०॥ २०॥ १॥ इति श्री मंत्रमहोदधौ नौकायां प्रथमस्तरंगः॥ १॥

आदौ सकलविघ्ननिवर्तकस्य श्रीगणेशस्य मंत्रान्वक्तुं प्रतिजानीते ॥ गणेशस्येति मनून्मंत्रान्मन्यते सर्वै-

र्येरिति ॥ मंत्रमुद्धरति ॥ जलं वः ॥ वन्हि रः ॥ तेन युतः ॥ तेन क्रा ॥ कामिका तः कर्णो द्वादशाद्या उ बिंदुयुता तेन उं दीर्घ आ तेन युतः

12

गणेशस्य मनून्वक्ष्ये सर्वाभीष्टप्रदायकान् ॥ जलं चक्री वन्हियुतः कर्णो द्वादश्या च कामिका ॥ १ ॥ दारको दी-
र्घसंयुक्तो वायुकवचपश्चिमः ॥ षडक्षरो मंत्रराजो भजतामिष्टसिद्धिदः ॥ २ ॥ भार्गवो मुनिरस्योक्तश्छंदोऽनु-
ष्टुबुदाहृतः ॥ विघ्नेशो देवता बीजं वं शक्तिर्यमितीरितः ॥ ३ ॥ षडक्षरैः सविधुभिः प्रणवाद्यैर्नमोंऽतिकैः ॥ प्रकु-
र्याज्जातिसंयुक्तैः षडंगविधिमुत्तमं ॥ ४ ॥ भ्रूमध्यकंठहृदयनाभिलिंगपदेषु च ॥ मनोर्वर्णान्क्रमान्न्यस्य
व्याप्य चाथ स्मरेत्प्रभुं ॥ ५ ॥ उद्यद्दिनेश्वररुचिं [illegible] निजहस्तपद्मैः पाशांकुशाभयवरान्दधतं गजास्यं
रक्तांबरं सकलदुःखहरं गणेशं ध्यायेत्प्रसन्नमखिलाभरणाभिरामं ॥ ६ ॥ ऋतुलक्षं जपेन्मंत्रमष्टद्र-
व्यैर्दशांशतः ॥ जुहुयात्मंत्रसंसिद्ध्यै वाडवान्भोजयेच्छुचीन् ॥ ७ ॥ ॥ ॥

दारको डः तेन डा वायुर्यः कवचं वं पश्चिमं अंत्यं यस्य स तथा वक्रतुंडाय हुं इति सविधुभिः सानुस्वारैः ॥ ॐ वं नमः हृदयाय नम
इत्यादि ॥ ४ ॥ व्याप्य सर्वशरीरे सर्वमंत्रं न्यस्येदित्यर्थः ॥ ५ ॥ ध्यानमाह उद्यदिति ॥ पाशाभये वामयोः वरांकुशावन्ययोः ॥ ६ ॥ वाडवान्विप्रान्

द्रव्याष्टकमाह इक्षवइति॥ पीठमंत्रमाह॥ गंसर्वशक्तिकमलासनायनमः॥११॥ एतेनासनंदत्वामूलेनमूर्त्तिंकल्पयेत्॥१२॥

भोगदा

इक्षवः सक्तवोरंभाः फलानिचि पिटास्तिलाः॥ मोदकान्नालिकेराणिलाजाद्रव्याष्टकं स्मृतं॥ ॥ पीठमाधारशक्त्यादि परतत्वांतमर्चयेत्॥ तत्राष्टदिक्षु मध्येच संपूज्यानवशक्तयः॥९॥ तीव्राच [illegible] ज्वालिनीनंदाकामरूपिणी उग्रातेजोवतीसत्यानवमी विघ्ननाशनी॥१०॥ विनायकस्यमंत्राणामेताः स्युः पीठशक्तयः सर्वशक्तिकमांते तुलासनायत् इति कः॥११॥ पीठमेतन्नदीयेन्नबीजेनादौसमन्वितः गदायासनमेतेनमूर्त्तिंमूलेनकल्पयेत्॥१२॥ तस्यांगणेशमावाह्यपूजयेद्दसनादिभिः॥ अभ्यर्च्यकुसुमैरीशंकुर्यादावरणार्चनं॥१३॥ आग्नेयादिषु कोणेषु हृदयंच॥ शिरः शिखां वर्माभ्यर्च्यास्त्रं तोनेत्रंदिक्ष्वस्त्रं पूजयेत्सुधीः॥१४॥ द्वितीयावरणेपूज्या प्रागाद्यष्टौचशक्तयः॥ विद्यारमा च धात्रीच भोगदाविघ्नघातिनी॥१५॥ विधिप्रदीपापापघ्नीपुण्यपार्श्वेशशीप्रभा॥ द्रजाग्रेषुवक्रतुंड एकदंष्ट्रोमहोदरः॥ गजास्यलंबोदरकौ विकटोविघ्नराजकः॥ धूम्रवर्णस्तदग्रेषु शक्राद्याआयुधैर्युताः एवमावरणेपूज्य पंचभिर्गणनायकः पूर्वश्चैवपुरश्चर्याकार्यामंत्रस्यसिद्धये॥१६॥ ॥ ॥

प्रयोगानाह ब्रह्मेति ॥ १९ ॥ मंडलादेकोनपंचाशद्दिनमद्दष्टं प्राप्नुयात् ॥ २५ ॥ मन्त्रांतरमाह ॥ रायस्पोषेति स्वरूपं भृगुः सद्याद्योयकारयुक्तः ॥ मेषोनः सात्वतो तौ सद्दशौऽप्युतो गगनं हः ॥ रतिर्णः ससद्यार्द्ध युता । शाङ्गी गः खं हः अन्यस

ततः सिद्धमनोकामान् प्रयोगान् साधयेन्निजान् ब्रह्मचर्यरतो नित्यं जपेद्द्वि सहस्रकं ॥ १९ ॥ षट् मास मध्याद्दारिद्र्यं नाशयत्येव निश्चितं ॥ चतुर्थ्यां स्त्रिचतुर्थ्ये तेजपेद्दशसहस्रकं ॥ २० ॥ प्रत्यहं तु जुहुयाद्दष्टोत्तरं शतमन्नं द्विजतः ॥ पूर्वोक्तं फलमाप्नोति षण्मासाद्भक्ति तत्परः ॥ २१ ॥ आज्याक्तान्नस्य होमेन भवेद्भ्नसमृद्धिमान् ॥ पृथुकैर्नालिकेरैश्च मरीचैर्वा सहस्रकं ॥ २२ ॥ प्रत्यहं जुहुतो मासान् जायते धनसंचयः जीरसिंधुमरीचाक्तैरष्टद्रव्यै सहस्रकं ॥ २३ ॥ जुहुयात् तिदिनं पश्चात् स्यात् कुबेरइवार्थवान् ॥ चतुं शतं चतुश्चत्वारिंशदाद्यं दिनंप्रति ॥ २४ ॥ तर्पयेन्मूलमंत्रेण मंडलादिष्टमाप्नुयात् अथ मन्त्रांतरं वक्ष्ये साधकानां निधिप्रदं ॥ २५ ॥ रायस्पोषं भृगुर्याद्योदद्दितामेषसात्वते सद्दशौ दोरलधातुमान् रक्षो गगनं रतिः रुद्र ॥ ससद्या बलवृश्च्ङी रवं तो षड्क्षरसंयुतः ॥ एकत्रिंशद्वर्णयुता मंत्रोऽभिष्टप्रदायकः ॥ २६ ॥ सायके स्त्रिषि रष्टाभिश्चर्तुभिः पंचभिर्रसैः ॥ मंत्रोत्थितै क्रमाद्वर्णैः षडंगं समुदीरितं ॥ २८ ॥ ॥ ॥ ॥
रूपं षडक्षरः पूर्वोक्तः ॥ यथा रायस्पोषस्यदद्दितानिधिदोरलधातुमान् रक्षोहणो बलगह्नोवक्रतुं गय हुमित्येक त्रिंशद्वर्णः पूर्ववत् षडङ्गकल्पना ॥ २९ ॥

13

मंत्रांतरमाह पद्मेति ॥ भानुर्मः ॥ पद्मनाभः एतद्युतः मेधाद्यः सद्यस्तद्युता लकौ लकारककारौ ॥ अनंतमाका

रमारूढो वायुर्यः पावकगेहिनी स्वाहा महाघोलाकाय स्वाहेति षड्वर्ण ॥ २७ ॥ नकुलीति लकुलीह कारः भृगुलो

लप्याद्यर्च्चाप्रयोगाः स्युः पूर्ववन्निधिदोन्ध्ययं पद्मनाभयुतो ॥ भानुर्मेधासत्यसमन्वित ॥ २८ ॥ ल

कावनंतमारूढो वायुः पावकगेहिनी ॥ षड्स्वरो यमादिष्टो भजतामिष्टदो मनुः ॥ २९ ॥ पूर्ववत्सर्व

मेतस्य समाराधनमीरितं ॥ लकुलो दशमारूढो भृगुतो लोहितः सदकु ॥ ३१ ॥ वक सदीर्घस्वसा

क्षिलिखे मंत्रः शिरोंतिकः ॥ नवाक्षरो मनुश्चास्य कंकोलः परिकीर्त्तितः ॥ ३२ ॥ विराड्छंदो देवतास्तु

स्यादुच्छिष्टविनायकः ह्राभ्यांत्रिभिर्द्वयेनाप्यह्राभ्यां सकलमंत्रतः पंचांगान्यस्य कुर्वीत ध्यायेत

शशिशेखरं ॥ ३३ ॥ चतुर्भुजं रक्ततनुं सुरेख्यपाशांकुशौ मोदकपात्रदंतौ करैर्दधानं सरसीरुहस्थमु

न्मत्तमुच्छिष्टगणेशमीडे ॥ ३४ ॥ लक्षमेकं जपेन्मंत्रं दशांशं जुहुयात्तिलैः ॥ पूर्वोक्ते पूजयेत्पीठे विधिनोच्छि

सकारात्तकरो दशमारूढो इकारयुक्तो ॥ तेनस्ति लोहितः पः सदकु इयुतः च स्वरूपं साक्षीइयुतः लिखेस्वरू

पं शिरोंतिकः स्वाहांतः हस्तिपिशाचिलिखे स्वाहा इति नवार्णाः ॥ ३० ॥ ३१ षडंगमाह ॥ ह्राभ्यामिति ह

स्तिहृदयायनमइत्यादि ॥ ३३ ॥ ध्यानमाह ॥ चतुर्भुजमिति अंकुशोस्त्रकपात्रेदंस्तयोः अन्यवोदन्तैः ॥ ३२ ॥

पृष्ठ ३६ ॥

स्वेतिकपिनारत्नचंदनेन॥ सितभानुनास्वेतार्केणप्रतिमाकार्याः॥ ३९ ४१ अनावृतोनिर्वेसनः॥ वल्मीकमृत्तिकाप्रतिमाएवंपूजितालाभंददाति॥ ४४ ४५॥ ॥ ॥

आदावंगानिसंपूज्यब्राह्म्याद्यादीन्प्रपूजयेत्॥ ब्राह्मीमाहेश्वरींचैवकौमारी॥ वैष्णवीतथा वाराहीचतथेंद्राणिचामुंडारमयासह॥ वक्रतुंडाद्यानष्टसुप्रतिपूजयेत्॥ ३६॥ वक्रतुंडैकदंष्ट्रेचतथालंबोदराभिधः॥ विकटोधूम्रवर्णाश्चविघ्नराजोगजाननः॥ ३७॥ विनायकोगणपतिर्हस्तिदंताभिधोंतिमः॥ इंद्राद्यानपिवज्राद्यान्पूजयेदात्मसिद्धये॥ ३८॥ एवंसिद्धेमनोमंत्रीप्रयोगानूकर्त्तुमर्हसि॥ स्वांगुष्टमतिमांकृत्वाकपिसितैर्भानुना गणेशप्रतिमारम्यांमुक्तलक्षणलक्षितां॥ प्रतिष्टाप्यविधानेनमधुनास्नापयेच्छतां॥ ४०॥ आरभ्यकृष्णभूतादिंयावत्शुक्लाचतुर्दशी॥ सगुडंपायसंतस्मैनिवेद्यप्रजेन्मनुं॥ ४१॥ सहस्रंप्रत्यहंतावज्जुहुयात्ससघृतैस्तिलैः॥ गणेशोयहमितिध्यायननुष्ठितोनावृतोरहः॥ ४२॥ पक्षाद्राज्यमवाप्नोतिनृपयोग्योपिवानरः॥ कुलालमृत्साप्रतिमाप्तनष्टवसुराज्यदा॥ ४३॥ वल्मीकमृत्कृतालाभमेवमिष्टाप्रयच्छति गेहेसौभाग्यदासेवलोवणोत्थाभयदीन्॥ निंबजानाजयेतशत्रूनुप्रतिमैवंसमर्चिता

(margin, vertical:) ॥ ४४ ॥ यत्राप्येतानिवेद्यमं...

जे
रु

च

अधिशय्यां शय्यायां कटुतैलं सर्षपतैलं ५६ अनरिं शत्रुहीनं ५८ तेन तेन तांबूलादिना ५९ बलिमंत्रमाह

स्मृतिर्गः सेंदुः सानुस्वारः आकाशं हः तथा सृष्टिलोक कारलकारौ कीदृशौ मन्वीदाद्यौ ॐकारानुसारयुतौ

समाधिशय्यामुच्छिष्टो जपन् शत्रून् वशं नयेत् कटुतैलान्वितै राजीपुष्पैर्विद्वेषयेदरीन् ५६ द्यूते वि

वादे समरे जेतौ यं जयमावहेत् कुबेरोस्य मनेर्जापान्निधीनां स्वामीतामियात् ५७ लेभाते राज्यम

नरिं वा नरेशविभीषणौ रक्तवस्त्रांगरागाढ्यस्तांबूलं निश्परं जपेत् ५८ यद्यन्निवेदितं तस्मै मोदकं

भक्षयन् जपेत् पिशितं वा फलं वापि तेन तेन बलिं हरेत् ५९ सेंदुः स्मृतिस्तथाकाशं मन्विंद्याद्यौ च

सृष्टिलौ पंचांतकशिवौ तद्वदुच्छिगभगान्वितः ५० उमाकांत शमाते हाय यक्षाय सबिंदवः बलिरि

त्येष कथितो नवं हृर्णो बले मनुः ५१ ध्रुवं माया सेंदु शार्ङ्गी बीजाद्यो नववर्णकः द्वादशार्णो मनुः प्रोक्तः

तेन क्लौं पंचांतक शिवौ गकारलकारौ तद्वन्मन्वेद्वाद्यौ तेन ग्लौं उच्छिष्टगस्य रूपं भागान्वितः उमाकां

तः एकारयुतो णः णे सबिंदुर्यः सानुस्वरो यकारः अन्यत् स्वरूपं मंत्रो यथा गं हं क्लौं ग्लौं उच्छिष्टगणेशा

य महायक्षाय यं बलिः इत्येकोनविंशत्यार्णो बलिमंत्रः ५० ५१ ५२ ॥ ॥

मंत्रांतरमाह॥ ध्रुवेति ध्रुवः प्रणवः हृत् नमः स्वरूपमन्यत्॥ मंत्रोयथा॥ ॐ नमः उच्छिष्टगणेशाय हस्तिपिशाचिलि
खेस्वाहेत्येकोनविंशतिवर्णाः मुन्यादिकमुच्छिष्टदेवता नवार्णवत् अर्चनं पूर्ववदित्यर्थः मंत्रांतरमाह तार
मिति॥ झिंटीशः रो चतुराननः दीर्घवियत् हा पाशः आं॥ अंकुशः क्रों परा ह्रीं सेद्गुः शार्ङ्गं भगयुते हे मेधे एका

ध्रुवोच्छिष्टगणेशायांते तु नवाक्षरः एकोनविंशत्यर्णाढ्यो मनुर्मुन्यादिपूर्ववत्॥५३॥ त्रिभिः सप्तभि
रक्षिभ्यां त्रिभिर्द्वाभ्यां हृदयेन च॥ मंत्रोत्थितैः सुधीवर्णैः कुर्यादंगं पुरार्चनं ५४ तारो नमो भगवते झिंटीश
श्चतुराननं दंष्ट्रायहस्तिमुखायेत्याप लंबोदराय च॥५५॥ उच्छिष्टमवियद्दीर्घं त्मने पाशांकुशो परा सेद्गुः
शार्ङ्गी भगयुते हे मेधे वन्हिकामिनी॥५६॥ उच्छिष्टगणनाथस्य मनुरष्टगुणाक्षरः गणको मुनिराख्यातो
गायत्री छंद ईरितं॥५७॥ उच्छिष्टगणपो देवो जपेदुच्छिष्टदेवतं॥ सप्तदिग्बाणसप्ताब्धियुगार्णोरंगकामनो
॥५८॥ शरान् धनुः पाशसृणी स्वहस्तैर्दधानमारक्तसरोरुहस्थं विवस्त्रपत्न्यां सुरतप्रवृत्तमुच्छिष्टमंबासुतमा
श्रये॥ इति धनुःपाशौ च वामयोः शरांकुशे दक्षयोः॥५९॥

कारयुतं घद्वयं वन्हिकामिनी॥ अन्यत्स्वरूपं ॐ नमो भगवते एकदंष्ट्राय हस्तिमुखाय लंबोदराय उच्छिष्टमहात्म
ने आं क्रों ह्रीं गं घे घे स्वाहा॥५४॥५५॥ अद्रिगुणाक्षरः सप्तत्रिंशदक्षरः॥५७॥ षडंगमाह सप्तेति॥५८॥ ध्यानमाह शरा

हृदु

15

तदुक्तं कृष्णा चतुर्दशी पर्यंतं ॥ ६० ६१ ६२ ६३ मृत्तासु कां कृत प्राणप्रतिष्ठां ॥ ६४ ॥ वज्री स्नुही ७० ७१ ॥ ॥

लक्षं जपेत् तद्दत्तैर्हुत्वा तद्दशांशं प्रपूजयेत् ॥ पूर्वोक्तपीठे स्वाभिष्ट सिद्ध्ये पूर्ववद्विभुं ॥ ६१ ॥ कृष्णाष्टम्यादि तदूर्ध्वं यावत्तावज्जयेन्मनुं ॥ प्रत्यहं साष्टसाहस्रं जुहुयात्तद्दशांशतः ॥ ६१ ॥ तर्पयेद्दापि मंत्रोयं सिद्ध एवं प्रयच्छति धनं धान्यं सुतान् पौत्रान् सौभाग्यमतुलं यशः ॥ ६२ ॥ मूर्त्तिं कुर्याद्गणेशस्य शुभाह्ने निंबदारुणा प्राणप्रतिष्ठां कृत्वाथ तदग्रे मंत्रमाजपेत् ॥ ६३ ॥ यं ध्यात्वा दासवत्सोपि वश्यो भवति निश्चितं ॥ नदीजलं समादाय सप्तविंशतिसंख्यया ॥ ६४ मंत्रयित्वा मुखं तेन प्रक्षाल्येशं सभां व्रजेत् ॥ यः श्येद्यं दृश्यते येन स वश्यो जायते क्षणात् ॥ ६५ ॥ चतुःसहस्रं धत्तूर पुष्पाणि मनुनार्पयेत् ॥ गणेशाय नृपादीनां जनानां वश्यताद्धृते ६६ ॥ सुंदरी वामपादस्य रेणुमादाय तन्नुते ॥ संस्थाप्य गणनाथस्य प्रतिमां प्रजपेन्मनुं ॥ ६७ ॥ तां ध्यात्वा रविसाहस्रं सप्ताहमायाति दूरतः ॥ स्वेतार्कनाथ निंबे न कृत्वा मूर्तिं घृतासुकां ॥ ६८ ॥ चतुर्थ्यां पूजयेद्रात्रौ रक्तैः कुसुमचंदनैः ॥ जप्त्वा सहस्रं तां मूर्त्तिं क्षिपेद्रात्रौ सरित्तटे ॥ ६९ ॥ सेष्टकार्यं समाचष्टे स्वाप्ने तस्य गणाधिपः ॥ सहस्रं निंबकाष्टानां होमाद्दुच्चाटयेदरीन् ॥ ७० ॥ वज्रिणः समिधो होमाद्रिपुर्यमपुरं व्रजेत् वानरस्यास्थिसंजप्तं क्षिप्रमुच्चाटयेद्गृहे नृ ॥ ७१ ॥ ॥ ॥ ॥

16

समं नरास्थिकं न्यायागृहे क्षिप्तं तु दासिकृत कुलालस्य मृदा स्त्रीणां वामपादस्य रेणुना॥७२॥कृत्वा पुत्त
लिकां तस्या हृदि स्त्री नाम संलिखेत्॥ निखनेत्तु मन्त्र संजप्तैर्निंबकाष्ठैः क्षिपता विमां॥७३॥ सोन्मत्ता भव
ति क्षिप्रमुद्धृतायां सुखं भवेत्॥ मन्त्रोरेवं कृता मातुलशुनेन समन्विता॥७४॥ विषमेस मनुग्रामे सिता
क निंबदारुजं॥ गणपं पूजितं सम्यक् कुसुमै रक्तचंदनैः॥७५॥ शरावां नगेतास म्यक् पूजिता॥ द्वारि
विद्विषः॥ निखा ता पक्ष मात्रेण शत्रुच्चाटन कृत्परता॥७६॥ मद्यभांडस्थितं हस्तमात्रेतं निखनेस्थ
ले तत्रोपविश्य गजपेत् मंत्रीन क्तं दिवामनुं॥७७॥ सप्ताह मध्ये नश्यंति सर्वे घोरा उपद्रवाः शत्रवो
वश्यतां यांति वर्द्धते धन संपदः॥७८॥ दुष्ट स्त्री वामपादस्य रजसा निजदेहजैः॥ मूलैर्मंत्रपुरीषाद्यैः
कुंभकारमृदापि च॥७९॥ एतैः कृत्वा गणेशस्य प्रतिमां मद्यभांडगां॥ संपूज्य निखनेद्भूमौ हस्तार्द्धे पू
रितं पुनः॥ संस्थाप्य वह्निं जुहुयात्कुसुमैर्हयमारजैः॥ सहस्रं सा भवेद्दासी तन्वा च मन साधनैः॥८०॥

मंत्रांतरमाह तारइति॥ तारः प्रणवः॥ महात्माङे महात्मने॥ पाशास्युक्तं॥ आत्मभूः क्लीं दहनांगना स्वाहा स्वरूपमन्यत्॥ ॐ हस्तिमुखाय लंबोदराय उच्छिष्टमहात्मने आं क्रों ह्रीं क्लीं ह्रीं हुं घे घे उच्छिष्टाय स्वाहा स्वरूपमन्यत्॥ ॐ हस्तिमुखाय लंबोदराय उच्छिष्टाय महात्मने॥ आं क्रों ह्रीं क्लीं ह्रीं हुं घे घे उच्छिष्टाय स्वाहा द्वात्रिंशद्वर्णः॥ २५

एवमादिप्रयोगास्तु नवर्णेनापि साधयेत्॥ तारो हस्तिमुखायाथ ङें तो लंबोदरस्तथा॥ ८२॥
उच्छिष्टांङे महात्माङे पाशांकुशशिवात्मभूः॥ मायामर्मि च घे घे उच्छिष्टाय दहनांगना॥ ८३॥
द्वात्रिंशदक्षरो मंत्रो पूजनं पूर्ववत्मतं॥ सरेषु सप्त षट् षड्भिर्नेत्राग्नी रंगभीरितं॥ ८४ उच्छिष्ट
गजवक्त्रस्य मंत्रेष्वेषु न शोधनं॥ सिद्धादिचक्र मासाद्यैः प्रामास्ते सिद्धिदा गुरोः॥ ८५॥ मनोवो
मीसदा गोप्या न प्रकाश्या युतः कुतः॥ परीक्षिताय शिष्याय देया वा निजसूनवे॥ ८६॥ मायात्रि
मूर्त्तिचंद्रस्थौ पंचांतक हुताशनौ॥ ताराद्विशक्तिबीजांतो मंत्रोयं चतुरःस्मरः॥ ८७॥ ॥ ॥

द्वात्रिंशद्वर्णः॥ २४ ॥ ह्रीं क्लीं ह्रीं उच्छिष्टगणेशाय नमः॥

कायरे षडंगमाह रसेति॥ ८४ उच्छिष्टगणेशमुक्त्वा शक्तिविनायसंज्ञं मंत्रांतरमाह मायेति॥ माया ह्रीं॥ पंचांतक हुताशनौ गकारेफौ॥ त्रिमूर्त्तिचंद्रस्थौ इकारानुस्वारयुतौ॥ तेन ग्रीं तारादि शक्तिबीजांतः प्रणवादिमायाबीजांतः

मायाशक्तिं॥ द्वितीयबीजं॥ ८–९॥ षडंगमाह॥ षडिति॥ अं ग्रां हृत् अं ग्रीं शिर इति॥ १०॥ ध्यानं विषाणेति अंकुशा मं० म०॥

भार्गवोस्य मुनिश्छंदो विराट् शक्तिर्गणाधिपः देवो मायाद्वितीये तु शक्तिबीजं प्रकीर्तितं॥ ८–९॥ षड्दीर्घाढ्ये द्वितीयेन ताराद्येन षडंगकं॥ विधाय सावधानेन मनसा संस्मरेत् प्रभुं विषाणांकुशावक्षसूत्रं च पाशं दधानं करैर्मोदकं पुष्करेण॥ स्वपत्न्यायुतं हेमभूषांबराढ्यं गणेशं समुद्यद्दिनेशाभमीडे॥१०॥ एवं ध्यात्वा जपेल्लक्षचतुष्कं तद्दशांशतः॥ अपूपैर्जुहुयाद्धोमं ध्वजे संतर्पयेच्च तं॥११॥ पूर्वोक्ते पूजयेत् पीठे केसरेष्वंगदेवताः॥ दलेषु वक्रतुंडाद्यान् ब्राह्मीमाद्या दलाग्रगाः॥१२॥ ककुप्पालानतर स्त्राणि सिद्ध एवं भवेन्मनुः॥ इतान्नमन्नं जुहुयाद्वर्षाद्धनवान् भवेत्॥१३॥ इतैर्वैरन्नमाप्नोति लवणैर्मधुसंयुतैः॥ वामनेत्रा वशी कुर्यादपूपैः पृथिवीपतिं॥१४॥ परमान्नैर्हुतात् लक्ष्मीरिक्षुखंडैर्नृपप्रियः॥ रंभाफलैर्नालिकेरैः पृथुकैर्य[illegible]ता भवेत्॥१५॥

इक्षुलक्ष्मयोः॥ अन्ये वामयोः॥ ककुप्पालान् इंद्रादीन्॥१२॥ परमान्नं पायसं॥१५॥ ॥ ॥ ॥ ॥
॥ ॥ ॥ ॥

युक्
17
ध
ध्य
राम
१७

मंत्रांतरमाह ॥ तारइति तार ॐ ॥ रमा श्रीं ॥ चंद्रयुक्तः खांतः गं समीरणोयः तोयं वः दीर्घानः ॥ वायुयः ॥ पावककामिनी स्वाहा ॥ अन्यस्यरूपं ॥ ॐ श्रीं गं सौम्याय गणपतये वर वरद सर्वजनं मे वशमानय स्वाहेत्यष्टाविंशत्या

र तारौं मा चंद्रयुक्तः खांतः सौम्या समीरणः यै तो गणपति स्तोयं रवरांते सदसर्वे तु ॥ ९ ॥ जनं मे वसमा ङे

दीर्घा वायुर्पावककामिनी ॥ अष्टाविंशति वर्णोयं मनुर्धनसमृद्धिदः ॥ ९० ॥ अंतर्यामी मुनिश्छं

दो गायत्री देवता मतोः ॥ लक्ष्मी विनायको बीजं रमा शक्तिर्वसुप्रिया ॥ ९ ॥ रमा गणेश बीजाभ्यां दी

ख्या र्घाभ्यां षडंगकं ॥ ९ ॥ दंताभये चक्रदरौ दधानं कराग्रगं स्वर्णघटं त्रिनेत्रं धृताब्जयालिंगितम

ब्धिपुत्र्या लक्ष्मीगणेशं कनकाभमीडे ॥ ९९ ॥ चतुर्लक्षं जपेन्मंत्रं समुद्भिर्बिल्वशाखिनः दशांशं

जुहुयात्पीठे पूर्वोक्ते तं प्रपूजयेत् ॥ १०० ॥ आद्यावंगानि संपूज्य शक्तिरष्टाविमाजपेत् बलाकी वि

मलारम्याच कमलावनमालिका ॥ ५ ॥ विभीषिकामलिका च शांकरी च सुमालिका ॥ शंखपद्मनिधी

पूज्यो पार्श्वयोर्दक्षवामयोः ॥ २ ॥ लोकाधिपांस्तदस्त्राणि तद्बहिः परिपूजयेत् एवं सिद्धे मनौ मंत्री प्रयोगा

णो लक्ष्मीगणेशमंत्रः ॥ ९ ॥ षडंगमाह रमेति ॥ श्रां गां हृत् श्रीं गीं शिरः ॥ श्रूं गूं शिखायइत्यादि ॥ ९ ॥ ध्यानमाह दंते

ति दंत शंखोपद्मयोः अभयचक्रे वामयोः ॥ शुंडाग्रे स्वर्णकुंभः ॥ तावत् त्रिलक्षतं ॥ ९९ ॥ १०० ॥ १०२ ॥

18

तत्फलं धनरद्धिः॥५८॥त्रैलोक्यमोहनगणेशमंत्रमाह वक्रेतिस्वरूपं॥णांतः तः कर्णेंदुयुक् उविंदुयुतः मन्मथः क्लींमायाह्रीं रमाश्रीं॥गजमुखेगं भगी हरिः॥एयुतस्तः ओबालोवः अग्नी रेः रेफारूढं जलं वं स्थिराजः

सत्योदः

उरोमात्रे जले मंत्री स्थित्वाध्यात्वार्कमंडले देवत्रिलक्षं जपतो धनरद्धिः प्रजायते॥बिल्वमूलं समाश्रित्य तावज्जप्ते फलं हि तत्॥अशोककाष्ठैर्ज्वलितेवह्नौ चाज्याक्ततंदुलैः॥१॥होमतो वशयेद्विश्वं अर्कका ष्ठसुचावपि॥स्वादिराग्नौ नरपतिं लक्ष्मी पायसहोमतः॥२॥वक्रकर्णेंदुयुक्णांतो टैकदंष्ट्राय मन्मथः मायारमागजमुखो गणपां ते भगी हरिः॥३॥वरबालाग्निसत्याः सरेफारूढं जलं स्थिरा॥संदुर्मेषोमेव शांते मानयेषबुधप्रियां॥४॥त्र्याच्चयस्त्रिंशद्वर्णाढ्यो मनुस्त्रैलोक्यमोहनः॥गणकोस्यऋषिः छंदो गायत्रीदेवता पुनः॥५॥त्रैलोक्यमोहनकरो गणेशो भक्तसिद्धिदः॥रविवेदशरोदन्वद्वसनेत्रैः षडंगकं॥
१५० गं नावेव पूरधनुः शूलचक्रसरोजोत्पलेपाशधान्याद्यदंतान्॥करैसंदधानं स्वशुंडाग्रराजन्मणी

दाबीज

संदुर्मेषः नं॥उषबुधिप्रिया स्वाहा॥स्वरूपमन्यत॥यथा वक्रतुंडैकदंष्ट्राय ह्रीं ह्रांश्रीं गंगणपते वरवरद सर्वज नं मे वशमानय स्वाहा इति त्रयस्त्रिंशद्वर्णाः॥२०॥षडंगमाह॥रविवि मि इति॥उदन्वंतश्चत्वारः॥१॥ध्यानमाह गदेति गदाबीजपूरश्शूलपद्मानि दक्षेषु॥अन्यान्यन्येषु॥ध्यानाग्रंश्रीहिमंजरी॥५१॥ ॥ ॥

[illegible]

किंभूतयापत्न्या ॥ सरोजन्मनापंक्षेण ॥ भूषणसमूहेन ॥ चन्द्रमानूज्वलद्दीप्यमानोहस्तोच्चलंतीतनुर्यस्य यस्या

सरोजन्मनाभूषयानांभरेणज्वलद्धस्ततन्वासमालिंगितांगं करींद्राननंचन्द्रचूडंत्रिनेत्रंजगन्मो हनंरक्तकांतिंभजेहं ॥ १२ ॥ वेदलक्षंजपेन्मंत्रं अष्टद्रव्यैर्दशांशतः हुत्वापूर्वोदितेपीठेपूजयेत्ग णनायकं ॥ १३ ॥ अंगार्चापूर्ववत्प्रोक्ताशक्तिःपत्रेषुपूजयेत् ॥ वामाज्येष्ठा ॥ रौद्री स्यात्काली क लपद्दादिका ॥ १४ ॥ विकरिण्याह्वयातद्वद्बलाद्याप्रमथान्यपि सर्वभूतदमिन्याख्यामनोमन्य पिचाग्रतः ॥ १५ ॥ दिक्षुप्रमोदसुमुखौदुर्मुखोविघ्ननायकः ॥ दीर्घाद्यामातरः पूज्याइन्द्राद्याआयु धान्यपि ॥ १६ एवंसिद्धेमनोकुर्यात्प्रयोगानिष्टसिद्धये वशयेत्कमलैर्भूपान्मंत्रिणःकुमुदै र्हुतैः ॥ १७ ॥ समिद्धैरश्वलदलसमुद्भूतैर्धरासुरान् ॥ उदुंबरोत्थैर्नृपतींनक्ष्णसैर्वैश्यविंशोतिमान् ॥ १८ ॥ क्षौद्रेणकनकप्राप्तिर्गोप्राप्तिःपयसागवां ॥ शष्टिर्दध्नादनैरत्लंघृतैःश्रीर्वेतसैर्जलं ॥ १९ ॥

च

थै

त्तया ॥ १२ ॥ दीर्घाद्यामातरः ॥ आंब्राह्म्यैनमः ॥ इंमाहेश्वर्यैनमः इत्यादि ॥ १५ ॥ चलदलोश्वत्थस्तस्यसमिद्भिः ॥ १७ ॥ धरासुरान्विप्रान् ॥ पूक्षसिमिद्भिर्वैश्यान् ॥ वटजाभिरंतिमान्शूद्रान् ॥ १८ ॥ १९ ॥ ॥

॥ तरं० २ ॥ हरिद्रागणेशमनुमाह ॥ तारइति ॥ ॐ वर्म हुं गणेशः गं भूः ग्लौं ॥ लोहितः पः ॥ आषाढीतः ॥ सत्योदः स्व मं० म०

॥ १९ ॥ र्णरेतसो वल्लभा स्वाहा ॥ स्वरूपमन्यत् ॥ यथा ॐ हुं गं ग्लौ हरिद्रागणपतये वरवरद सर्वजनहृदयं स्तंभय स्वाहेति द्वात्रिंशदूर्णः

तारो वर्म गणेशो भूः हरिद्रागणलोहितः ॥ आषाढी येवर वरसत्य सर्वतथा जनः ॥ २१ ॥ हृदयं स्तंभय द्वंद्वं वल्लभा स्वर्णरेतसः द्वात्रिंशदक्षरो मंत्रो मदनो मुनिरीरितः ॥ २२ ॥ छंदोनुष्टुप् देवता तु हरिद्रा गणनायकः ॥ वेदाष्टशरसप्तांग नेत्रार्णैरंगमीरितं ॥ २३ ॥ पाशांकुशौ मोदकमेकदंतं करैर्दधानं कनकासनस्थं ॥ हारिद्रखंडप्रतिमं त्रिनेत्रं पीतांशुकं रात्रिगणेशमीडे ॥ २४ ॥ तेदलक्षं जपित्वांते हरिद्राचूर्णमिश्रितैः ॥ दशांशं तंदुलं हुत्वा ब्राह्मणानपि भोजयेत् ॥ २५ ॥ पूर्वोक्तपीठमयजेदंगमातृदिशाधिपः एवमाराधितो मंत्रः सिद्धो यच्छेन्मनोरथान् ॥ शुक्लपक्षे चतुर्थ्यां तु कन्यापिष्टहरिद्रया विलिप्यांगं जले स्नात्वा पूजयेत् गणनायकं ॥ २६ ॥ तर्पयित्वा पुरस्तस्य सहस्रं साष्टकं स्मरेत् शतं हुत्वा साज्यपूपैर्भोजयेत् ब्रह्मचारिणः ॥ २७ ॥ कुमारी रतिसंतोष्यगुरुं प्राप्नोति वांछितं ॥ लाजैः कन्यामवाप्नोति कन्यापित्रभिर्वरं ॥ २८ ॥ राम १९

२०१ षडंगमाह वेदेति ॥ २९ ॥ ध्यानमाह ॥ पाशेति ॥ अंकुशमोदकौ दक्षयोः ॥ पाशदंतावन्ययोः ॥ [illegible] ॥

रात्रिगणेशो हरिद्राङ्गणपतिः ॥ २३ ॥ कुमारीरपीति भोजनेनान्वेति शार्ङ्गी गः मांसस्थितो लकारस्थः ग्लं मिति बीजं ॥ हरिद्रागणपतेः पूजनं पूर्ववत् ॥ २४ ॥ इति श्रीमन्महीधरविरचिते नौकायां द्वितीयस्तरंगः ॥ २ ॥ अथ कालीमंत्रानू वक्तुं प्रतिजानीते ॥ अथेति मंत्रमुद्धरति ॥ क्रोधीशेति ॥ क्रोधीशः कः तत्त्रयं वह्निवामाक्षिविधुभिः

वंध्या नारी रजःस्नाता पूजयित्वा गणाधिपं ॥ पलप्रमाणगोमूत्रपिष्टासिंधुवचा निशाः ॥ २५ सहस्रं मंत्रयेत् कन्या वरान् संभोज्य मोदकैः ॥ पीत्वा तद्दोषघं पुत्रं लभते गुणसागरं ॥ २६ ॥ वीणास्तंभं गुरिं स्तंभं कुर्यान्मनुज्ञ पासितः जलाग्निचौरसिंहास्त्रप्रमुखान् परिरोधयेत् ॥ २७ ॥ शार्ङ्गी मांसस्थितः सेंदुर्बीजमुक्तं गणेशितुः ॥ हरिद्राख्यस्य यजनं पूर्ववत् प्रोदितं मनोः ॥ २८ प्रोक्ता एते गणेशस्य मंत्रा इष्टप्रभीसता गोपनीयान् दुष्टेभ्यो वदनीयाः कदाचन ॥ २९ ॥ इति श्रीमहीधरविरचिते मंत्रमहोदधौ गणेशमंत्रकथनं नाम द्वितीयस्तरंगः ॥ २ ॥ अथ कालीमनून् वक्ष्ये सद्यो वाक्सिद्धिदायकान् ॥ आराधितैर्यैः सर्वेष्टं प्राप्नुवंति नरा भुवि

इकार इकारानुस्वारैर्युतं ॥ तेन क्रीं ॥ वाराहो हः ॥ वामकर्णः ऊः ॥ दक्षिणे स्वरूपं ॥ दीर्घा सृष्टिः ॥ आकारयुतः कः क्षिपालः ॥ सद्वक्त्र इयुतः ॥ च क्रोकः ॥ क्षितीशमारूढः युतः के प्राणुक्तं आदावुक्तं बीजानां सप्तकं वह्निप्रिया स्वाहा ॥ यथा क्रां क्रीं क्रीं हुं हुं ह्रीं ह्रीं दक्षिणे कालिके क्रीं क्रीं दीर्घवर्महुं ॥ षडंगमाह ॥ षडिति क्रामि

क्रीं हूं हूं ह्रीं ह्रीं स्वाहेति २३४५

स्यादि मातृकामिति अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं नमो हृदि १ दक्षभुजे २ वामभुजे पं० ३ दक्षिणपादे मं० ४ ॥ वाम० पादे इत्यैक्रमेण न्यसे दित्यर्थः ॥ ७ ॥ ध्यानमाह सद्य इति खड्गवरौ दक्षयोः सद्यः छिन्नशिरोऽभये वामयोः सृक्

क्रोधीशान्वितयं वन्हि वामाक्षि विधुभिर्युतं हकारद्वितयं चाम कर्णचंद्र समन्वितं ॥ ३ ॥ मायायुग्मं दक्षिणे च दीर्घास्त्रष्टिः सवह्नि क्रिया ॥ च क्रोधिशिरीश मारूढः प्राग्भ [illegible] बीज सप्तकं ॥ ४ ॥ मंत्रो वन्हिप्रियांतो यं द्वाविंशत्यक्षरो मतः ॥ न चात्र सिद्ध साध्यादि शोधनं मनसोपि न ॥ ५ ॥ न यत्नातिशयः कश्चित् सुरक्ष्य योनिमित्रकः ॥ विद्याराज्ञी स्मृते रेव सिध्यष्टकमवाप्नुयात् ॥ ६ ॥ भैरवो स्य ऋषिः छंद उष्णिक् कालिनु देवता ॥ बीजं मायादीर्घ वर्मशक्तिरुक्तामनीषिभिः ॥ ७ ॥ षट् दीर्घाद्याढ्य बीजेन विधायांगमीरितं ॥ मातृकां पंचधा भक्तान्वर्णान् दश दश क्रमात् ॥ ८ ॥ हृदये भुजयोः पाद द्वये मंत्री प्रविन्यसेत् ॥ व्यापकं मनुनाकृत्वा ध्यायेच्च त्वसि कालिकां ॥ सद्यः छिन्नशिरः कृपाणमभयं हस्तैर्वरं बिभ्रतीं घोरास्यां शिरसां स्रजा सुरुचिरां सुन्मुक्तकेशावलिं सृक्कासृक्प्रवहां श्मशाननिलयां श्रुत्योः शवालंकृतां श्यामांगीं कृतमेखलां शवकरैर्देवीं भजे कालिकां ॥ ९ ॥ एवं ध्यात्वा जपेल्लक्षं जुहुयात्तद्दशांशतः प्रसूनैः करवीरोत्थैः पूजा

णोरोष्ठप्रांतयोरसृजो रुधिरस्य प्रवाहो यस्यां स्तां श्रुत्योः कर्णयोः शवालंकारयुतां ॥ ९ ॥

पीठमंत्रमाह। ह्रीं कालिकायोगपीठात्मनेनमइति॥ १३।१५।१७ महादंष्ट्रान्तां महाभैरवीं सिंहाद्यासिंहभै

त्रिकोण

यंत्रमथोच्यते। १५ आदौ षट्कोणमारभ्यैं त्रितयं ततः पद्ममष्टदलं बाह्ये भूपुरं तत्र पूजयेत्। ११ जयाचवि जयापश्चादजिताचापराजिता नित्यासिलासिनीचापि दोग्ध्रीअघोराचमंगला। १२ पीठशक्तयास्तासु कालिकायोगपीठतः। आत्मनेहृदयां तोयं माया (?) यादिपीठमंत्रतः। १३। अस्मिन्पीठेयजेद्देवीं शिवरूपमवस्थितां महाकालरतां सक्तांशिवाभिर्दिक्षुवेष्टितां। अंगानि पूर्वमाराध्य षट्पत्रेषु समर्चयेत्। १४ क्लींकपालिनीं कुल्लांकुरुकुल्लां विरोधिनीं॥ विप्रचित्तां च संपूज्य नवकोणेषु पूजयेत्। १५ उग्रामुग्रप्रभां दीप्तां नीलां घनबलाकिकां। मात्रां मुद्रां तथा मित्रां पूज्याः पत्रेषु मातरः। १६ पद्मस्याष्टसु युग्मेन ब्राह्मीनारायणीत्यपि माहेश्वरीचचामुंडाकौमारीचापराजिता। १७ वाराहीनारसिंहींच पुनरेतासु भूपुरे भैरवीं महदाद्यां तां सिंहाद्यां धूम्रपूर्विकां। १८ भीमोन्मनादिकां चापि वशीकरणभैरवीं। मोहनाद्यां समाराध्य शक्रादीनायुधान्यपि। १९ एवमाराधिता काली सिद्धा भवति मंत्रिणां। ततः प्रयोगान्कुर्वीत महाभैरवभाषितान्। २० आत्मनेवापरस्यार्थे क्षिप्रसिद्धिप्रदायकान्। स्त्रीणांमहारं निंदां च कौटिल्यं

रवीं। धूम्रपूर्विका धूम्रभैरवीं। भीमोन्मतादिकां। भीमभैरवींच। मोहनमोहनभैरवी चा। १८।१९॥ ॥ ॥ ॥

तरं०२ मदनावासंभगं २२ अधियामिनीरात्रौ २३ २६ त्रिगुणपंचाराः कृणाय संदृशे पीठे महाकालेन भर्त्रा मारयुद्धं सुरतं
२९

चासियंवचः २१ आत्मनोहितमन्विच्छन् क्लीभक्तो विवर्जयेत् सदृशे मदनावासं पश्यन्यः प्रजपेन्मनुं २२
अयुतं सोचिरादेव वाक्पतेः समतां सियात् दिगंबरो मुक्तकेशः स्मशानस्थो धियामिनीं २३ जपेद्यो यायुत
मेतस्या भवेयुः सर्वसिद्धयः शवंहृदयमारुह्य निर्वासाः प्रेतभूगतः २४ अर्कपुष्पसहस्रेण भ्यक्तेन स्वीय
रेतसा देवींयः पूजयेद्भक्त्या जपन्नेकैकशो मनुः २५ सोचिरेणैव कालेन धरणीप्रभुतां व्रजेत् रजःकीर्णं
भगं नार्याध्यायन्योयुतमाजपेत् २६ सकवित्वेन रम्येण जनान्मोहयति ध्रुवं त्रिपंचारे महापीठे शवस्य
हृदिसंस्थितां माहाकालेन देवेन मारयुद्धं प्रकुर्वतीं २७ तांध्यायंस्मेरवदनां विदधत्सुरतं स्वयं जपे
सहस्र मपियः शशंकरसमो भवेत् २८ अस्थिलोमत्वचायुक्तं मांसं मार्जारमेषयोः उष्ट्रस्यमहिष
स्यापिबलिं यस्तु समर्पयेत् २९ भूताष्टम्योर्मध्यरात्रे वश्यास्युः सस्यजंतवः विद्यालक्ष्मीयशःपुत्रैः
साचिरं सुखमेधते ३० ॥ ॥ ॥ ॥ ॥ ॥ ॥

कुर्वतां २७ ३० कालीमंत्रभेदानाह मायेति मायाह्रीं पूर्वहूं करखरूपं शांतिरीइति विधुःविंदुः तेनैषमन्यत्

क्रीं उक्त्वा बीजानि व्युत्क्रमेणस्वरु

ॐ ह्रीं ह्रीं हूं हूं क्रीं क्रीं दक्षिणे कालिके क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं इत्येकविंशत्यर्णः ताराद्यष्टगणावाद्यः ३८

योऽहविष्याशनरतो दिवा देवीं स्मरन् जपेत् नक्तं विधुं नासक्तो लक्षं स स्याद्धरापतिः ३१ रक्ताम्भोजैर्हुतैर्मन्त्री धेनेर्जयति वित्तमं बिल्वपत्रैर्भवेद्राज्यं रक्तपुष्पैर्वशीकृतिः ३२ असृजा महिषादीनां कालिकां यस्तु तर्पयेत् तस्य स्युरचिरादेव करस्थाः सर्वसिद्धयः ३३ यो लक्षं प्रजपेन्मंत्रं शवमारुह्य मंत्रवित् तस्य सिद्धो मनुः सद्यः सर्वेप्सितफलप्रदः ३४ तेनाश्वमेधप्रमुखैर्यागैरिष्टं सुजन्मना दत्तं दानं तपस्तप्तं उपास्ते यस्तु कालिका ३५ ब्रह्मा विष्णुः शिवो गौरी लक्ष्मी गणपतिः रविः पूजिताः सकला देवा यः कालीं पूजयेत् सदा ३६ अथ कालीमंत्रभेदा उच्यन्ते सिद्धिदायिनः मायायुग्मं कूर्चयुग्मं करं शांतिविधुत्रयं ३७ दक्षिणे कालिके पूर्वबीजानि स्युर्विलोमतः एकविंशतिवर्णात्मा तारासाद्यः पूर्ववद्यजिः ३८ बिल्वमूले शवारूढो वटमूले तथैव च लक्षं मनुमिमं जप्त्वा सर्वसिद्धीश्वरो भवेत् ३९ काली कूर्चं इहल्लेखा दक्षिणे कालिके पदात् पुनर्बीजत्रयं वह्निवधूर्मन्वक्षरो मनुः ४०

मंत्रान्तरमाह कालि क्रीं कूर्चं हुं ह्रल्लेखा ह्रीं वह्निवधूः स्वाहा क्रीं हूं ह्रीं दक्षिणकालिके क्रीं हूं ह्रीं स्वाहेति चतुर्दशार्णाः ४० मंत्रान्तरमाह कूर्चेति हूं हूं क्रीं क्रीं क्रीं ह्रीं दक्षिणे कालिके पूर्वबीजानि स्वाहेति विंशत्यार्णः वशीकृतौ

यजनं पूर्ववत्प्रोक्तं अस्य मंत्रस्य मंत्रिभिः ॥ समइतिशेषः ॥ ४२ ॥ मंत्रांतरमाह मंत्रराजेति ॥ क्रीं ३ हूं २ ह्रूं २ दक्षिणे स्वाहेति पंचदशार्णः ॥ ४३ मंत्रांतरं ब्रह्मेति ब्रह्माकः ॥ वामनेत्रइ क्रीं ॥ ४४ ॥ षडर्णमाह ॥ बीजं क्रीं दीर्घयुतश्च क्रीं का ने

22

॥ ८० ॥ आवाहनी स्थापनी संन्निधापनीयं निरोधिनी सन्मुखीकरणी सकलीकरणी अवगुंठनी अमृती मं० म० करणी परमीकरण्यो नवाहन्यादिमुद्राः ताः उक्ताः ॥

क्रिया चपौरुषीवीराचतुर्थी लपराजिता विजयाजयया युक्तामुक्तिदाचसदाशिवा ॥ ८० ॥
मनोन्मनी तु नवमी दशमी सर्वतोमुखी ॥ एता पवित्रग्रंथीनां देवताः परिकीर्त्तिताः ॥ ८१ ॥
आवाहनादिमुद्राभिर्नवभिः साधकोत्तमः ॥ तदावाहनादिकं कृत्वा तत्रार्च्चेचंदनादिभिः ॥ ८२ ॥
एवं पवित्राण्यभ्यर्च्यदद्याद्गंधपवित्रकं ॥ तद्गृधयित्वा तोरणात्हृदये नाभिमंत्रयेत् ॥ ८३ ॥ प्रणम्य प्रार्थयेद्देवं श्लोकयुग्ममिमं पठन् ॥ ओं मंत्रितोपि देवेश साद्दै देव्या गणाम्बरैः ॥ ८४ ॥ मंत्रेशै लोकपालैश्च सहितः परिचारिकैः ॥ आगच्छ भगवान्नीश विधिसंपूर्त्तिकारकः ॥ ८५ ॥ प्रात स्त्वां पूजयिष्यामी सानिध्यं कुरु केशव ॥ ततो गंधपवित्रं तत्पादयोर्विन्यसेत्प्रभोः ॥ ८६ ॥

ताभिस्तदावाहादिनादिकं पवित्रे देवतानां ब्रह्मादीनां पदार्थानुसमयेनावाह नादिकृत्वा गंधाद्यैरर्चयेत् ८२ ॥ ८६ ॥

केशवः पदस्थाने ऊहः ॥ शंकरभास्करविघ्नराद् इति ॥ भगवत्यां पवित्रारोपणेषु लिंगोहोऽपि कार्यः आमंत्रिता

सं सि देवेशि आगच्छेथा भवानीशे विधिं पूर्त्तिकारिके सान्निध्यं कुरु पार्वतीत्यादि लिंगपदानाम् ऊहः ।६७।६८।६९।।

७०।। कनिष्टपवित्रारोपणे देवं श्वेतं ध्यायेत् ॥

केशवेति पदस्थाने कार्य ऊहान्य देवता ॥ भगवत्यां पदे ऽप्यत्र लिंगोहो मंत्रवित्तमैः ॥७७॥ अधि

वासं विधायेत्थं निशि जागरणं चरेत् ॥ देवस्य स्तुतिनामानि वदन् गायंश्च तद्गुणान् ॥७८॥ प्रा

तर्नित्यार्च्चनं कृत्वा मूलेनाष्टोत्तरं शतं ॥ कनिष्ठाख्यं पवित्रं तद् गृहीत्वा चाभिमंत्रयेत् ॥७९॥

घंटावादित्र वेदानां कारयन् घोषमद्भुतं ॥ जयशब्दांश्च देवस्य कंठे मूलेन चार्पयेत् ॥८०॥ एवमे

वार्पयेदन्ये पवित्रे मध्यमोत्तमे ॥ श्वेतरक्तं क्रमात् पीतं ध्यायेद्देवं तदर्पणात् ॥८१॥ वनमालापु

वित्रं तत्ताव मूलेन मंत्रितं ॥ अर्पयेनु दिष्ट देवस्य मुकुटे मूलमुच्चरन् ॥८२॥ ततः सुवर्ण कुसुमं

पुष्पैः सप्तमितैः सह ॥ मूलाभिमंत्रितं देवमूर्द्धि मूलेन चार्पयेत् ॥८३॥

मध्यमारोपणे रक्तं ज्येष्ठारोपणे पीतमिति ॥८४॥ तावद्यष्टोत्तरं शतं ॥८४॥८३॥

हृदाद्यपदलस्थानि पवित्राण्यभिमंत्रयेत्॥ तत्तन्नाम्ना नमोंतेन परिवारसुरानुयजेत्॥७४
एवंपवित्रैः संपूज्य धूपादीनि प्रकल्पयेत्॥पावके देवमावाह्य नित्यं होमं विधाय च॥७५॥मूले
नाग्निपवित्रं तर्पयेद्देवतां स्मरन्॥मूर्तौ देवं समुद्वास्य वह्निं संयोज्य चात्मनि॥७६॥पुष्पांजलिं
विधायेशं कर्मानेन निवेदयेत्॥मंत्रहीनं क्रियाहीनं भक्तिहीनं कृपानिधे॥७७॥पूजनं पूर्णता
मेतु पवित्रेणार्पितेन नतदे॥ इति संप्रार्थ्य देवेशं योजयेद् हृदये निजे॥७८॥गुर्वंतिकं ततो गत्वा दत्वा पु
ष्पांजलिं गुरौ॥स्वांगे षडंगं विन्यस्य गुरोर्देहेपि विन्यसेत्॥७९॥पाद्यं दत्वा तथैवार्घ्यं वस्त्रालंकार
चंदनं॥पुष्पैः संपूज्य मूलेन पवित्रं तद्गलेर्पयेत्॥८०॥स्वशक्त्या दक्षिणां दत्वा दंडवत्प्रणमेद्गुरुं॥अ
न्येभ्यः शिष्टवृद्धेभ्यः पवित्राणि ददीत च॥८१॥ ॥ ॥ ॥ ॥ ॥

सर्वथा गुरुवंशाभावे कंचिद्विप्रं संपूज्य तस्य पवित्रं समर्प्य दक्षिणां दत्वा पवित्रपूजा पूर्णास्त्विति तद्वचनं प्रार्थयेत् ॥१॥ या ॥२॥ ३ ॥ १ ध्यायस्यामिति ॥

सर्वथैव गुरोः पूजा कर्तव्या मंत्रिणा सदा ॥ अपूजिते गुरौ सर्वा पूजा भवति निष्फला ॥१॥ तदसेर भावे तत्सुतं तदभावे तदात्मजं ॥ दौहित्रे तदभावे तु पूजयेद् गुरुगोत्रजं ॥२॥ ततो दत्वा पवित्राणां स्वं भोजयित्वा द्विजोत्तमान् ॥ भुंजीत तदनुज्ञातो बंधुभिः स्वजनैः सह ॥३॥ यथा कथंचित्कुर्वीत पवित्रारोपणं सुरार्चने ॥ विधेरुक्तस्य चाशक्त्या पूजासंपूर्तिहेतवे ॥४॥ यस्यां कस्यां तिथौ कुर्यात्तिथावुक्तं न चेत्तु ॥ सर्वथा श्रावणे चैव कमपि तंतु निवेदयेत् ॥५॥ सत्यं ब्रूयः पवित्रेण पूजां कुर्वीत देवते ॥ ऐश्वर्यारोग्यसंयुक्तो नेकवर्षाणि जीवति ॥६॥ संपूर्णहायने पूजा देवतानां कृतां तु या सर्वा संपूर्णतामेति पवित्रदमनार्पणात् ॥७॥

उक्तातिथौ करणासंभवे सर्वथा श्रावणे पवित्रपूजा चैत्रे दमनार्चा चेति नित्यत्वेनावश्यं कार्ये त्यर्थः ॥ ४ ॥

॥८२॥

अन्येष्वपीति॥उपरागश्चंद्रसूर्यग्रहणं॥अर्द्धोदयलक्षणंतु॥अमार्कपातश्रवणेमध्येचैत्पौषमाघयोः॥मं०म०॥ अर्द्धोदयाभिधोयोगः॥कोटिसूर्यग्रहाधिक इति॥सौम्यायनमकरसंक्रांतिः॥आदिशब्दाद्युगादयोमन्वादय॥श्रवणद्वादशीमुखाःग्राह्याः॥तत्रइष्टदेवमहोत्सवोमहापूजाचविधेया॥८९॥तत्रहेतुमाह॥यथेति॥९०॥शुचौआषाढे॥तत्रदहेचतुर्थ्यादोगणेशादीनां॥ऊर्जेकार्त्तिके॥९१॥माघकृष्णचतुर्दश्यांशुक्लप

अन्येष्वप्युपरागार्द्धोदयसौम्यायनादिषु कुर्यादलभ्ययोगेषुविशेषाःदेवतार्चनं॥८९॥ यथायथेष्टदेवेषुनृणांभक्तिःसमेधते॥प्राप्यतेतैरयत्नेनमनोभीष्टंतथातथा॥९०॥शु चौतत्तदहेकुर्याद्देवस्वापनोत्सवं॥ऊर्जेतथैवदेवानामुत्थापनविधिंसुधीः॥९१॥माघ कृष्णाचतुर्दश्यांविशेषाच्छिवपूजनं॥अश्विनाद्यनवाहेषुदुर्गापूजायथाविधि॥९२॥गोपा लंपूजयेद्विद्वान्नभःकृष्णाष्टमीदिने॥रामंचैत्रासितेपक्षेनवम्यामर्चयेत्सुधीः॥९३॥वैसा खाद्यचतुर्दश्यांविशेषाच्छिवपूनरसिंहंप्रपूजयेत्॥यजेत्शुक्लचतुर्थ्यांतुगणेशंभा द्रमाघयोः॥९४॥

क्षादिमासाभिप्रायेण॥शिवरात्रौशिवपूजाप्रकारःशिवागमादेबोध्यं॥नवरात्रौदुर्गार्चनविधिरपितदा गमादेव एवमग्रेपिग्रंथगौरवभयान्नोच्यते॥९३॥९४॥

आषाढीति चातुर्मास्येपि अवश्यं तत्तद्दृशलभ्यं स्वेष्टं किंचिद्वस्तु वर्जयेत् यो विना नियमं मर्त्यो व्रतं वा जाप्य
मेव वा तुर्मास्य नयेन्मूढो जीवन्नपि मृतो हि सइत्यादि निं।दा श्रवणात्।९५।९९।१००।इति मंत्र०महोदधौ नौ
कायां दमनपवित्रार्चनं कथनं नाम त्रयोविंशस्तरंगः।।२३।। ।।

याकाचित्सप्तमी शुक्ला रविवारे युता यदि।तस्यां दिने शं संपूज्य दद्यादर्घ्यं पुरोहितं।९५।म
हालक्ष्मीयज्ञे दृह्वा श्रीकृष्णाष्टमी दिने माघस्य शुक्लसप्तम्यां विशेषाद्दिननायकं।९६।
मघ्यल्लसोदितां नन्यान्द्रेवतापीतिवर्द्धनात्।विशेषनियमानूनत्सा भजेत् देवमनन्यधीः
।९७।आषाढी कार्त्तिकी मध्ये कंचिनियममाचरेत्।देवतापीतये विद्वानूजनपूजादितत्परः
।९८।एवं यो भजते विष्णुं रुद्रं दुर्गां गणाधिपं भास्करं श्रद्धयानित्यं स कदाचिन्नसीदति।९९।
स्वधर्ममाचरन्नित्यं देवपूजापरायणः।जितेंद्रियोखिलान्भोगान्प्राप्येहानंततां व्रजेत्।१००
इति श्रीमन्महीधरविरचिते मंत्रमहोदधौ नौ० दमनपवित्रार्चनं नाम त्रयोविंशस्तरंगः२३।।
साधकानां शीघ्रसिध्यैमंत्रसिध्यैमथाब्रुवे।साधकस्याभिधानादिवर्णा माराथ शोधये
त्।१।

।।मंत्रशुद्धि माह।साधकानामिति।१।। ।।

॥ तरं०२४ ॥२४॥ अकथहचक्रमाह ऊर्ध्वगाइति षोडशकोष्ठकान्विधाय तत्र एकत्रि एकादश नवद्वि चतुर्द्वा- ॥ मं० म० ॥
॥ २०७ ॥
दशदश षडष्ट षोडश चतुर्दश पंच सप्त पंचदश त्रयोदशेषु कोष्ठेषु क्रमाद्कारादि वर्णान्पुनःपु
नः पुनः ॥ विलिख्य कोष्ठे चतुष्कं सिद्धसाध्यादि विचिंत्य पुनश्च तुष्को सिद्धादिगणनं कार्यं ॥

मंत्राद्यक्षरपर्यंतं चक्रे सिद्धादिके क्रमात् जन्मार्क्षाथं प्रसिद्धं वा नामयाद्यं विशोधने २॥
ऊर्ध्वगाः पंचरेखाः स्युः पंच तिर्यगता पुनः ॥ कोष्ठानि तत्र जायंते षोडशैवात्र संलिखेत् ॥३॥
भूरामशिवलिंगाक्षिवेदार्क दिग्रसाष्टभिः कलामनुशरैरद्रि तिथिविश्वैर्मितेषु च ॥४॥ कोष्ठे
षु मातृकावर्णास्तत्र नामादितः क्रमात् ॥ सिद्धसाध्य सुसिद्धारि र्ज्ञेया मन्त्राक्षरावधिः ॥५॥ य
स्मिंश्च तुष्के नामार्णास्तस्यासिद्धचतुष्टयं ॥ प्रादक्षिण्यात्तु द्वितीयं साध्याख्यं तत्तृतीय
कं ॥६॥ सुसिद्धाख्यं चतुर्थं तु सपत्न्याख्यं स्मृतं बुधैः ॥ एककोष्ठद्वयोवर्णाः सिद्धः सिद्धः प्रकीर्ति
तः ॥७॥

॥ राम ॥
॥ २०७ ॥

तत्र प्रथमचतुष्के यस्यां च दिशि नामार्णाः ॥ द्वितीयादिचतुष्केषु तद्दिशमारभ्य सिद्धादि गणयेत् ॥ एवं गणने
सिद्ध सिद्धः ॥१॥ सिद्धसाध्यः सिद्धसुसिद्धः ॥ सिद्धारिः ॥४ साध्यसिद्धः ॥५॥६॥७॥

साध्यसाध्यः साध्यसुसिद्धः साध्यारिः सुसिद्धसिद्धः॥१०॥ ११॥ सुसिद्धसाध्यः सुसिद्धः सुसिद्धः सुसिद्धारिः॥१२॥ अरिसिद्धः॥१३॥ अरिसाध्यः॥ अरिसुसिद्धः॥ अर्यरिरिति षोडशभेदा भवंति॥१२॥ तेषां फलमाह॥ सिद्धसिद्धो यथोक्तेनेत्यादिना यथोक्तेन कल्पोक्तेन पूजादिना सिद्धो भवतीत्यर्थः॥१३॥१४॥

तद्द्वितीये मंत्रवर्णो सिद्धि साध्य उदाहृतः॥ तृतीये सुद्द सुसिद्धः सिद्धारिः स्याच्चतुर्थके॥१॥ नामार्णयुक् चतुःकोष्ठान् मन्त्रवर्णश्च द्वितीयके॥ चतुष्के तत्र पूर्वं तु यत्र नामाक्षरं स्थितं॥ तत्र तत्कोष्ठमारभ्य गणयेत्पूर्ववत्क्रमात्॥ साध्यसिद्धः साध्यसाध्यस्तत्स्वसिद्धश्च तद्रिपुः॥१०॥ एवं ज्ञेयस्तृतीये चतुष्के मंत्रवर्णकः॥ तदा पूर्वोक्तया रीत्या क्रमात् ज्ञेया विचक्षणैः॥११॥ स्वसिद्ध सिद्धस्तत्साध्यस्तत्सुसिद्धश्च तद्रिपुः॥ चतुर्थे तु चतुष्के स्याद्दार सिद्धोरिसाध्यकः॥१२॥ तत्स्वसिद्धोर्यरिः पश्चादेवं मंत्रं विचारयेत्॥ सिद्धसिद्धो यथोक्तेन द्विगुणात् सिद्धसाध्यकः॥१३॥ सिद्धसुसिद्धोर्द्धजपात् सिद्धारिर्हंति बांधवान्॥ साध्यसिद्धो द्विघ्नजपात् साध्यसाध्यो निरर्थकः॥१४॥

घ्नात् कल्पोक्तद्विगुणात् तत्सुसिद्धः साध्यसुसिद्धः॥

208

द्विघ्नातकल्प्योक्तद्विगुणानान्तसुसिद्धः साध्यसुसिद्धः १५ १६ प्रकारांतरेणसिद्धादिशोधनमा
ह नाम्नइति १७ १८ व्युत्क्रमान्तसिद्धसुसिद्धानांबहुत्वेसाध्यारिणांअल्पत्वेशुभमित्यर्थः

द्विघ्नातजपान्तसुसिद्धः साध्यारिर्हंति गोत्रजान् सुसिद्धसिद्धोद्विजपान्तसाध्योद्विगु
णाज्जपात् १५ तत्सुसिद्धोमहादेवसुसिद्धारिः कुटंबहा अरिसिद्धः सुतंहन्यादरि
साध्यस्तुकन्यकां १६ तत्सुसिद्धसुपत्नीघ्नस्तदरिः साधकापहः नाम्नोमंत्रस्यव
र्णांश्चलिखित्वाप्रतिवर्णके १७ सिद्धादिगणनाकार्यायावन्मंत्रसमापनं ना
म्नोयदिसमाप्तिः स्यात्पुनर्नामलिखेत्सुधीः १८ एवंसंशोधितेयस्युर्भूरयःसा
ध्यवैरिणः अल्पाः सिद्धसुसिद्धाश्चेदशुभंव्युत्क्रमाच्छुभं १९ मतमित्थंतुकेषां
चित्तदपिप्रायंमतं अथवान्यप्रकारेणसिद्धादीनांविशोधनं २० द्वादशारलिखे
च्चक्रेवर्णानिपूर्वादितःक्रमात् ईशानांतमकाराद्यानहांतानषंढविवर्जितान् २१

इदंमतंप्रायसंमतंबुमतं २० अकडमचक्रमाह द्वादशारइति षंढाऋॠऌॡतद्रहितान २१

तरं॰ २४
२०९

२२ जपहोमतः जपाद्धोमाधिक्येन २३ स्पष्टार्थमाह सिद्धो नवैकबाणेष्विति २४ २५ १६ प्रकारांतरमाह नाम्न इति नाममंत्रयोर्वर्णानेकीकृत्य चतुर्भक्ते एके शेषे सिद्धः द्विशेषे साध्यः त्रि

तत्रानामार्णमारभ्य मंत्रवर्णावधि क्रमात् गणयेत् सिद्धसाध्यादिकं तेषां विनिर्दिशेत् २२ सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः सुसिद्धः प्राप्तिमात्रेण साधकं भक्षयेदरिः २३ सिद्धो नवैकबाणेषु साध्यो रसदिगाशिषु सुसिद्धस्त्रिमुनीशेषु रिपुर्वेदाष्टभानुषु २४ अन्योपीह प्रकारोस्ति सिद्धसाध्यादिशोधने चतुःकोष्ठेषु विलिखेदादिवर्णात् पुनः पुनः २५ नामार्णात् सिद्धसाध्यादिर्ज्ञेयं मन्त्रस्यावधि चतुर्थोपि प्रकारोस्ति सिद्धादीनां विशोधने २६ नाम्नो मंत्रस्य वर्णौघं चतुर्भिर्विभजेत् सुधीः एकादिशेषे सिद्धादिक्रमात्तत्त्वं विचक्षणैः २७ सिद्धादिशोधनं प्रोक्तमथवान्यं भशोधनं नेत्रभूगुणवेदस्माधरानयनभूभुजाः २८

शेषे सुसिद्धिः शून्ये त्वरिः फलं पूर्वोक्तं २९ भशोधनं नक्षत्रशोधनं तत्र नक्षत्रेषु वर्णविभागमाह॥

सम

२८
२०९

ऊर्ध्वं पुनक्षत्रेषु २९ पोह्मभागेरेवसंज्ञे ३० ३१ ३२ ऋणधनन्नोधनमाहस्मेति तिर्यक्समरेखा:

द्विचंद्रभुजबाहस्त्रिभूनेत्रत्रिधरागुणाः एकेकं भूजेष्वक्षिरामचंद्राउद्भवय २९ अ
श्विन्यादिषुविज्ञेया आदिवर्णाः क्रमाद्बुधैः क्षातांबिंदुविसर्गौतोपोह्मभागेव्यवस्थि
तौ ३० जन्मसंपतविपक्षेमप्रत्यरिःसाधकोवधः मैत्रपरममैत्रंचगणनीयंस्वनाम
भात् ३१ विपद्वधःप्रत्यरिश्चत्याज्याःअन्यदुत्तमं अथर्णधनसंशुद्धिः कथ्यतेसि
द्धिदायिनी ३२ सप्ततिर्यगलिखेद्रेखाद्वादशौर्ध्वगाःपुनः॥ एवंकृतेतुजायंतेकोष्ठा
षट्षष्टिसंमिताः ३३ आद्यपंक्तौलिखेदंकांल्लेकथ्यंतेयथाक्रमं मनुनक्षत्रमैत्रा
र्कतिथिषद्दस्वब्धयः ३४ सायकोवसवोनंदाः कोष्ठेषुक्रमतःस्थिताः द्वितीयपंक्तौ
संलेख्याःपंचह्रस्वान्विताःस्वराः ३५

ऊर्ध्वगाद्वादशाकृत्वा ३३ आद्यपंक्तौचतुर्दशाद्यंकाः ३४ द्वितीयायांआईऊॠलृहीनास्वराःएकादश:
३५

नरं० २४ ॥ तृतीयायांकादिटांताः चतुर्थ्यांतापफादिहांताः पंचम्यांवादिहांताः षष्ठ्यांदशाद्यंकाः लेख्याः॥
२९० ३६ ३८ कोष्टेयावतीति यावतितमेकोष्टेवर्णस्तिमंकंउपर्यंकेनगुणयेत् यथा प्रथमकोष्टस्य
अकारः चतुर्दशगुणितः चतुर्दशैव द्वितीयकोष्टस्थरकारः सप्तविंशत्यागुणितश्चतुः पंचाशत

210

तृतीयपंक्तौकाद्यर्णष्टिकारांताः शिवैर्मिताः वादिफांताश्चतुर्थ्यांतुपंचम्यांबादिहांतिमाः
३६ षष्ठ्यांपंक्तौक्रमाल्लेख्यास्त्र्यंकाकथ्यंतराववे दिकचंद्रमुनिवेदाष्टगुणसप्तेषुसा
गराः ३७ रसाश्चरामसंख्याताएवमंकाउदीरिताः मंत्रवर्णान्पृथक्कुर्यात्स्वरव्यंज
नरूपतः ३८ कोष्टेयावतिवर्णास्यात्गुणयेत्तावदंककं कोष्टोपरिस्थेनांकेनसर्वव
र्णेष्वयंविधिः ३९

एम

एवंतृतीयकोष्टस्थउकारःसद्भ्यांगुणितःषट् एवमग्रेपिसाधकनामवर्णादिमादिभिरेव
गुणनीयाः साध्यस्यांकानेकीकृत्याभिभक्तैःशेषःसाध्यराशिः एवंसाध्यकांकान्गुणिता २९०
नेकीकृत्यअष्टभक्तेशेषःसाधकराशिः ३९ ॥ ॥ ॥ ॥ ॥

४० ४१ मंत्रराशिरधिकश्चेत्तदाह ४२ प्रकारांतरेणऋणधनशोधनमाह नामादिति ४३ ४४

दीर्घाक्षराणामंकास्तु तेयालघ्वक्षरस्थिताः एकीकृत्याखिलानंकानष्टभिर्विभजेत्सुनः ४० शे
षांके मंत्रराशिः स्यान्नामवर्णेष्वियं विधिः अधःपंक्तिस्थितैरंकैर्गणनीयास्तुतेखिलाः ४१
अधमर्णोधिकोराशिरूनोराशिर्धनीस्मृतः मंत्रोयदाधनर्णः स्यात्तदाग्राह्योधनी नतु ४२
एवं धनर्णसिंप्रोक्तमन्यथाप्रोच्यते पुनः नामाद्यक्षरमारभ्ययावन्मंत्रादिमाक्षरं ४३ ग
णयेन्मात्रकावर्णान्क्रमेणगुणयेत्त्रिभिः विभक्तेसप्तभिः शिष्टोराम राशिरुदीरितः ४४
एवं मंत्रार्णमारभ्य यावन्नामादिमाक्षरं गणयित्वात्रिभिर्हत्वा विभजेत्सप्तभिः सुधिः ४५
मंत्रराशिः स्मृतः शिष्टः पूर्ववद्गणितार्णिता यद्वामंत्राक्षराणीहस्वरव्यंजनरूपतः ४६
॥ ॥ श्रीरामचंद्रायनमः॥ ॥ ॥श्रीरामजीः॥ ॥

४५ धनिनाऋणिनाचपूर्ववत् अधिकशेषऋणीहृनोधानीत्यर्थः प्रकारांतरमाह यद्वेति
४६ छ॥ ॥ श्रीरामचंद्रायनमः॥ ॥ श्रीरामजीः॥ ॥ ५ ॥

तरं॰ २८
२११

नाद्व्योः स्वरव्यंजनरूपेण पृथक्कृतैः साधकनामाक्षरैर्योजयेत् ४७ ४८ ऋणिना धनिना पूर्वम्
त् अधिको ऋणीत्यादि ४९ मंत्रस्य ऋणत्वे हेतुमाह योमंत्र इति पूर्वजन्मन्युपासनसमये पा

पृथक्कृत्य द्विगुणयेत् योजयेत्साधकाक्षरैः नाद्व्योरष्टभिर्भक्ते मंत्रराशिरुदाहृतः ॥
४७ एवं नामार्णसंघोपि द्विगुणीकृत्य योजितः मंत्रवर्णैरष्टभक्तो नामराशिः स्मृ
तो बुधैः ४८ ऋणिना धनिना चात्र पूर्वं व्यसरि कीर्तिता उक्तान्यतममार्गेण शोध
नीयमृणं धनं ४९ यो मंत्रः पूर्वजनुषि सेवितो नार्पयत्फलं पापात्पापक्षये जाते
फलावाप्तिरनेहसि ५० आयुःक्षयात्तगतो नात्रं साधकोस्य भवांतरे ऋणित्वाच्चा
प्तिमंत्रेण मंत्रोभीष्टं प्रयच्छति ५१ समांकोयद्युभौ राशी तदा संसेवनात्फलं धनी मंत्र
स्तु संप्राप्तः फलत्यधिकसेवया ५२

राम
~~~~
२११

पं स ह्यवात पापक्षयं कुर्वन्नान्यत्फलं ददौ ततः पापक्षयं कृत्वा फलदानकाले उपासितुरायुःक्षयो
जातः स मंत्रः फलदानात् जन्मांतरे ऋणी जातः स प्राप्तिमात्रेण इष्टफलदो भवतीत्यर्थः अनेहसि काले
~~~~

५३ नपुंसकाॠऌॡवर्णाः ५४ ५५ ५६ रसवर्णः षडक्षरः ५७ रद्नाक्षरो द्वात्रिंशद्वर्णः

मंत्राणां शोधने भूयः प्रकारांतरमुच्यते षट्कोणेषु लिखेत्पूर्वकोणादेकैकवर्णकान् ५३
अकारादि हकारांतान्नपुंसकविवर्जितान् नामाद्यक्षरमारभ्य मंत्राणि विधिशोधयेत्
५४ प्रथमे सम्पदां प्राप्तिर्द्वितीये धनसंक्षयः तृतीये धनसंप्राप्तिश्चतुर्थे बंधुविग्रहं
५५ पंचमे तु भवेद्व्याधिः षष्ठे सर्वस्य संक्षयः एवं संशोधितं मंत्रं दद्याच्छिष्याय मांत्रि
कः ५६ येषामनूनां सिद्धादिशोधनं नास्ति तान् ब्रुवे तकवर्णास्त्रिवर्णा वा पंचार्णो
रसवर्णकः ५७ सप्तार्णो नववर्णश्च रुद्रार्णो रद्नाक्षरः अष्टार्णोऽहिंसमंत्रश्च कूटो
वेदो दितो ध्रुवः ५८ स्वप्नलब्धाः स्त्रियाः प्राप्तो मालामंत्रो नृकेसरी प्रासादो रविमंत्र
श्च वाराहो मातृकापराः ५९ ॥ ॥ ॥ ॥

कूटो व्यंजनसमूहः ध्रुवः प्रवः ५८ पराह्री ५९ ॥ ॥ ॥ ॥

तरं: २४ पक्षिनायकोगरुडमंत्रः ६० ६१ ६२ अरिमंत्रत्यागप्रकारमाह सुदिनइति सुपाय्यमाऽग्नोधनो

२१२

त्रिपुराकाममंत्रश्चास्मात्सिद्धः पक्षिनायकः बोधमंत्राजेनमंत्रानेषुसिद्धादिशोध
नं ६० एतद्भिन्नेषुमंत्रेषुशुद्धिरावश्यकीमता विद्यामंत्रेस्तवं सकंमरिभूतस्यजेफ
वं ६१ अरिमंत्रोगहीतश्चेदज्ञानवशतस्तदा तस्यत्यागःप्रकर्तव्यस्तत्प्रकारोधुनोच्य
ते ६२ सुदिनेस्थापयेत्कुंभंसर्वतोभद्रमंडले विलोमंसंजपन्मंत्रं पूरयेत्तंसुपाय्यसा
६३ तत्रदेवंसमावाह्ययजेदावरणान्वितं तदग्रेस्थंडिलंकृत्वाप्रतिष्ठाप्यानलंततः
६४ जुहुयान्मूलमंत्रेण विलोमेनाज्यतंघृतैः दिक्पतिभ्योबलिंदद्यात्पायसान्ने
घृतान्वितैः ६५ पुनःसंपूज्यदेवेशंप्रार्थयेन्मनुनामुनाअनुकूल्यमनालोच्यम
यानरलबुधिना ६६ यद्रूपात्तंपूजितंचप्रभोमंत्रस्वरूपकं तेनमेमनसःक्षोभमशेषंविनि
वर्तय ६७

राम

२१२

212

२८

इकेन ६३ ६४ ६५ ६६ ६७ ॥ ॥ ॥ ॥ ॥ ॥ ॥

६८ ६९ तंकुंभंजलैरापूर्य तत्रकुंभेमंत्रयुक्तंताडपत्रंक्षिपेत् ७० ७२ क्रमोत्क्रमतयावर्णमा
लया ॐरामायनमः ॐरामायनमइत्यादिल्लांतंप्रजप्यततेआरभ्यपुनरभ्यपुनर

पापंप्रतिहतंचास्तुभूयात्श्रेयःसनातनं ततोनुममकल्याणंपावनीभक्तिरस्तुते
६८ एवंसंप्रार्थ्यदेवेशंकर्पूरागरुचंदनैः विलोमंविलिखेन्मंत्रंतालपत्रेतस्त्व
येत् ६९ प्रबध्यनिजमूर्द्धनिस्नायात्कुंभस्थितेजलैः पुनःसंपूर्यतंतोये
न्यस्यांतर्मंत्रपत्रकं ७० संपूज्यकुंभंसरितितडागेवाविनिःक्षिपेत् विप्रा
नसंभोज्यमुच्येतपीड्यासौमनुष्यया ७१ अनेकधात्रोधनेचैघुद्दोनप्राप्य
तेमनुः मायांकामांश्रियंचादौरघातद्दोषमुक्तये ७२ यद्वादुष्टोमनुर्जप्तःसि
द्धेस्तएवसंपुत्रटः यद्वाक्रमोत्क्रमतयाजप्तव्योवर्णमालया ७३ यत्रयस्यभ
वेद्भक्तिर्विशेषःसमनूतमः वैरिकोष्टमयिप्राप्तोभीष्टस्तस्यजायते ७४ ॥ ५ ॥

कारपर्यंतंगणयेत् एवंजप्तोरिमंत्रोपिसिद्धिदः १३४ ॥ ॥ ॥

त्रं· २४ २९३

त्रिविधामंत्रानाह बीजेति ७५ नखावधिः विंशत्यर्णावधिः ७६ ७८ ७९ तृतीय वर्गगाः तृतीयवर्गास्त्रिरक्षराः तृतीयाः गजडदबा कऔउऊ उलिलृ एते भूतवर्णाः

बीजमंत्रास्तथामंत्रामालामंत्रास्तपरे त्रिधामंत्रगणाःप्रोक्ताबुधैरागमवेदिभिः ७५ बीजमंत्रादशार्णांतास्ततोमंत्रानखावधिः विंशत्यधिकवर्णायेमालामंत्रास्तुतेस्मृताः ७६ बाल्येवयसिसिद्ध्यंतिबीजामंत्राउपासितुः मंत्रासिद्धायौवनेतुमालामंत्राश्चवर्द्धके ७७ उक्तान्यस्यामवस्थायामभीष्टंप्राप्नुयेसुधीः भबीजमंत्रादिमंत्राणांद्विगुणंजपमाचरेत् ७८ स्वकुलान्यकुलाख्याथमंत्राणांभेदउच्यते प्रकृतिःपंचभूतात्मातंतोजातानुमातृका ७९ तस्माद्वर्णास्तुपंचाशत्संचभूतमयायथा तृतीयवर्गगाकर्णौबोलत्लृपार्थिवात्मका ८० नासेऊवर्गतुर्याश्चवसोवर्णास्मिताःप्र पां नेत्रेद्वितीयावर्गाणामेरक्षाःपावकात्म

८१ ऋॠउघढधभवसाःएतेजलवर्णाः नेत्रेइति इईखछठथफऐरक्षाआग्नेयाः ८१

राम

२९३

213

वर्गाद्याइति कचतटपञ्चाणञ्चयषाणेनेवायवीयाः वर्गांतिमाइति ङञणनमललृञ्चह
ञ्चंएतेनाभसाः ८२ विसर्गस्यपंचभूतमयत्वमाहञ्चन्येवर्णाःकंनादिस्थानानिस्प

वर्गाद्यानंतडिंटीञ्चात्रयस्यामारुतामताः वर्गांतिमाः कपोलोञ्चोहोविंदुश्चेतिना
भसाः ८२ विसर्गस्तुप्रकृत्यात्मासर्वभूतमयोयतः प्राणेरितोःविनियाति
कंनादिस्थानमस्पृशन् ८३ पार्थिवादिकवर्णानांस्वकीयाः स्वकुलाभिधाःपा
र्थिवस्यतुवर्णस्यमित्रंवारुणमक्षरं ८४ तैजसंशत्रुभूतंस्यादुदासीनंतुमारुतं॥
जलोद्भवस्यवर्णस्यपार्थिवंमित्रमीरितं ८५ सपत्नंवह्निसंभूतमुदासीनंतुवाय
वं तैजसस्याथवर्णस्यवायवंमित्रमुच्यते ८६ विद्वेषीवारुणोवर्णोउदासीनस्तुपा
र्थिवः पवनोत्थितवर्णस्यमित्रंवह्निसमुद्भवं ८७ शत्रुःपार्थिववर्णःस्यादुदा
सीनस्तुतोयजः चतुर्णांपार्थिवादीनामाकाशार्णाःसखासदा ८८॥ ६७ ॥

र्गांतिसर्गस्तुननत्थाइतिसर्वभूतमयत्वं ८३ एषांस्वकुलान्यकुल पार्थिवेति ८४ ८८

तरं० २५ २१४

८९ फलमाह स्वकुलेभीसिनासिद्धिरिति ९० ९१ ९२ पुनर्मंत्रत्रैविध्यमाह पुंस्त्रीति

मनोःसाधकनाम्नोपियोवर्णादिर्मोतयोः यद्येकभूतदेवत्यंजानीयात्स्वकुलं तयोः ८९ स्वकुलादिकभेदस्तुशोध्योमंत्रःप्रदिक्षता स्वकुलेभीप्सितासिद्धिः सिद्धिर्मित्रेपिकीर्तिता ९० अमित्रेमरणंरोगउदासीनेनकिंचन उदासीनम मित्रंचमंत्रंदूरेणवर्जयेत् ९१ स्वकुलंमित्रभूतंचगृह्णीयादिष्टकामुकः न क्षेत्रेक्यपिसंप्रोक्तंस्वकुलंनाममंत्रयोः ९२ पुंस्त्रीनपुंसकाःप्रोक्तामनवस्त्रिवि धाबुधैः वषडंताःफडंताश्चपुमांसोमनवःस्मृताः ९३ वौषट्स्वाहांतिकानार्योहुं नमोंतानपुंसकाः वश्योच्चाटनरोधेषुपुमांसःसिद्धिदायकाः ९४ क्षुद्रकर्मरुतांनाशे स्त्रीमंत्राःशीघ्रसिद्धिदाः अभिचारेस्मृताःक्लीबाएवंतेमनवस्त्रिधा ९५ ॥

राम

२१४

९३ तेषांनियोगमाह वश्येति ९४ ९५ ॥ ८९ ॥ ६५ ॥ ६५ ॥

९६ छिन्नतादीति छिन्नोरुद्धः शक्तिहीनइत्यादयः पंचाशद्दोषास्तल्लक्षणानि च शारदातिलकटि-
तीपटलेउक्तानिग्रंथगौरवान्नलिख्यंते सप्तकोटिमितामंत्राः संतितेसर्वेपितद्दोषाक्रांताइत्यर्थः ९७
९८ जननाख्यंसंस्कारमाह भूर्जेपत्रेरोचनाकुंकुमचंदनैःशक्तामभिमुखंत्रिकोणंकृत्वात्रिभ्यापिकी

नक्षत्रशोधनेजन्मनक्षत्रमितरत्ततुः शोधनेमंत्रिभिर्ग्राह्यंप्रसिद्धंजन्मनामवा ९६ इतःसं
शोधितोमंत्रोभवेच्छिप्येष्टसिद्धये छिन्नतादिकदोषायेपंचाशत्तंत्रसंस्थिताः ९७ तैर्दोषैः
सकलाव्याप्तामनवःसप्तकोटयः अतस्तद्दोषशांत्यर्थंसंस्कारंसाधकश्चरेत ९८ भूर्जपत्रेलि
खेत्सम्यक्त्रिकोणंरोचनादिभिः वारुणंकोणमारभ्यसप्तधाविभजेत्समं ९९ एवमीशा
ग्निकोणाभ्यांजायंतेनत्रयोनयः नववेदमितास्तत्रविलिखेन्मातृकाक्रमात १००॥ ५७ ॥

णाभ्यामध्येकृताभिः षट्षट्रेखाभिःसमाभिःसमाभिः मध्येनववेदमिताएकोनपंचाशत्त्रिकोणः
कोष्टाजायंते तत्रेशानादिपश्चिमकोणांतमातृकालिखित्वावाग्देवींसंपूज्यततएकेकंमंत्राणंसमु
द्धरेत ततःसंमार्ज्यपत्रांतरेलिखेदित्यर्थः एतज्जननं ९९ १०० ॥ ५९ ॥ ५९ ॥

तरं २४ दीपनमाह जपइति हंसमंत्रेणपुटितस्यमंत्रस्यसहस्रजपोदीपनं हंसः रामायनमः हंसइति १०२
२१५ बोधनमाह नभइति नभोहः वह्नीरः इंदुर्बिंदुः तैर्युतः अर्घ १ ह्रः एतेनहूं एतत्संपुटितस्यमनोपं
चसहस्रंजहस्रंजपोबोधनंहूंरामायनमः हूमिति ३ फट्रामायनमः फडितिसहस्रंजपस्ताडनं

अकारादिहकारांतानाम्नादिवर्णावधिः देवींतत्रसमावाह्यपूजयेच्चंदनादिभिः १०१
ततः समुधरेन्मंत्रंजननंतदुदीरितं जपोहंसपुटस्यास्यसहस्रंदीपनंस्मृतं २ नभोवह्नी
इयुक्ताघीसंपूज्यस्यमनोर्जयः सहस्रपंचकमिनोबोधनंतस्मृतंबुधैः ३ सहस्रंतुजपेदस्त्र
पुटितंताडनंतुतत् वाकहंसनारैर्जप्तेनसहस्रंपाथसामनुं ४ अभिषिंचेत्तवागाद्यैरभिषे
कोयमीरितः हरिर्वह्न्यान्वितस्तारीवषडंतोध्रुवादिकः ५ ॥ ६ ॥ ७ ॥ ८ ॥

राम

४ अभिषेकमाह वागिति ऐंहः सः ॐइतिमंत्रेणसहस्राभिर्मंत्रितेजलेस्तेनैवमंत्रेणताडपत्रोप
रिलिखितेमंत्रेअभिषेचनमभिषेकः ४ विमलीकरणमाह हरिरिति हरिस्तकारः वह्न्यान्वितः
तारीप्रणवयुतः त्रों ध्रुवादिकः ॐमाद्यः ॐत्रोंवषट् रामायनमः वषट्त्रोंॐमितिसहस्रजपोविमली २१५

जीवनमाह स्वधेति स्वधावषट्रामायनमः वषट्स्वधेतिसहस्रजपोजीवनं ६ तर्पणमाह क्षीरेति
दुग्धघृतोदकैस्त्रेनैवमंत्रेणतास्मिन्नेवम्रानतर्पयेदितितर्पणं गोपनमाह जपेदिति ह्रींपुटस्यस
हस्रंजपोगोदापनं ७ बालायान्तृतीयंसौः गगनंहः तदाद्येनह्सौः इतिबीजेनसंपुटस्यसहस्र

सहस्रंतत्पुटंजप्यादिमलीकरणेमनुं स्वधावषट्पुटंजप्यासहस्रंजीवनेमनुं ६ क्षीरा
ज्यपुतपाथोभिस्तर्पयेजर्पणेमनुं जपेन्मायापुटंमंत्रंसहस्रंगोपनंहितत् ७ बालाना
तीयबीजेनगगनाद्येनसंपुटं सहस्रंप्रजपेन्मंत्रंमेनराप्यायनंमतं ८ संस्कारदशकं
प्रोक्तंमनुनांदोषनाशनं सिद्धिप्रदाःकलियुगेमंत्रास्तान्प्रवदाम्यतः ९ अर्णएकाक्षरोनु
ष्टुप्त्रिविधोनरकेसरी एकाक्षरोर्जुनोनुष्टुप्द्विविधस्तुरगाननः १० ॥ ७ ॥

जपआप्यायनं एकवर्णेनसंपुटत्वमादावंतेचोच्चारणमेवएकस्यविलोमत्वागजेतः ८ ९ सिद्धमं
त्रानाह त्र्यर्णइति त्रिअर्णःत्रिविधः नरकेसरीनृसिंहः एकाक्षरोनुष्टुप्लक्षणे द्विविधोहय
ग्रीवः १० ॥ ॥ ॥ ॥ ॥

तरं॰ २४ चिंतामणिः क्षमरयोंइति क्ष्म्रौमेतत्कूटं ११ १२ विप्रक्षत्रविड्गोदेयान्मंत्रानाह अघोरइति॥

२१६

216

चिंतामणिः क्षेत्रपालो भैरवोयक्षनायकः गोपालोगजवक्त्रश्चवरुकायक्षिणीतथा ११
मातंगीसुंदरीश्यामातारा कर्णपिशाचिका शबर्येकाजटावामाकालीनीलसरस्वती १२
त्रिपुराकालरात्रिश्चकलाविष्णुप्रसादमे अघोरोदक्षिणामूर्तिरुमामाहेश्वरोमनुः १३
हयग्रीवोवराहश्चलक्ष्मीनारायणस्तथा प्रणवाद्याश्चतुर्वर्णाविङ्क्रेमंत्रास्तथारवेः १४
प्रणवाद्योगणपतेर्हरिद्रागणनायकः सौरोष्टाक्षरमंत्रश्चतथारामषडक्षरः १५ मं
त्रराजोध्रुवादिश्चप्रणवोवैदिकोमनुः वर्णत्रयायदातव्यानान्यवर्णेकदाचनः॥
॥ १६॥ सुदर्शनः पाशुपतःमाग्नेयास्त्रंनृकेसरी वर्णद्वयायदातव्यानान्यवर्णे
कदाचन १७॥ ॥ श्रीरामजीः॥ ॥श्रीरामजी॥ ६७ ॥

राम

२ हु हॉ

२१६

उमामाहेश्वरः ॐह्रींह्रौंनमः शिवायेति १३ १५ मंत्रराजोनारसिंहः १६ विप्रक्षत्रेयानाहसुदर्श

वर्णचतुष्टयदेयान्मंत्रानाह छिन्नमस्तेति १८ १९ २० बीजेषुविधिमाह मायामिति मायाकाम
श्रीवाग्बीजानिमुखजन्मनेविप्राय कामश्रीवाचोबाहुजेभ्यः ऊरुजेभ्यःविड्भ्यः श्रियंगिरंश्रीवा

छिन्नमस्ताचमातंगीत्रिपुराकालिकाशिवः लघुश्यामाकालरात्रिर्गोपालोजानकी
पतिः १८ उग्रताराभैरवश्चदेयावर्णचतुष्टये मंगीदृशांविशेषेणमंत्राएतेसुसि
द्धिदाः १९ ब्राह्मणाःक्षत्रियावैश्याः शूद्रानार्योधिकारिणः श्रद्धावंतोदेवगुरुद्विजपूजा
सुसर्वदा २० मायांकामांश्रियंवाचंप्रदद्यान्मुखजन्मने मायामृतेबाहुजेभ्यऊरुजेभ्यः
श्रियंगिरं २१ वाणीबीजंतुशूद्रेभ्योन्येभ्योवर्मवषट्नमः सर्वसाधारणमथहोमद्रव्य
मुदीर्यते २२ फलेर्हुतैःसुखावाप्तिः पालाशैरिष्टसिद्धयः हयमारैःस्त्रियोवश्यागद्
व्यारोगसंक्षयः २३ दूर्वयायुर्विवृद्धिःस्याद्गुडेननरवश्यता बिल्वपत्रैःघृतैःपद्मैपाटि
लैश्चंपकैःश्रियः २४ ॥ ॥ ॥ ॥ ॥

चो २१ वाचंशूद्राया अन्येभ्यःप्रतिलोमानुलोमजेभ्योवमादिः २२ हयमारैःकणवीरैः २३।२४

तरं॰ २४

२१७

जातिभिर्जातीपुष्पैः होमेन वाचो वाक्सिद्धिः प्लक्षादिजातेन एधसा समिद्भिः २५ किंशुकादि
भिर्हुतैः क्रमाद्विप्रादयो वश्याः कृतमालो राजवृक्षः २६ गंधवस्तुभिः कर्पूरादिभिः २७ काला

सिद्धार्थैर्मल्लिकाभिश्च कीर्तयो जातिभिर्गिरः व्रीहिभिश्च यवैः प्लक्षोदुंबराश्वत्थजे
धसा २५ तिलैस्त्रिमधुरैरिष्टाः संपदः स्युर्नृणां हुतैः किंशुकैः काममदैश्च कृत
मालैश्च पाटलैः २६ विप्रादयः क्रमाद्वश्याः सौभाग्यं गंधवस्तुभिः कोद्रवैर्व्याधियोरी
णामुन्मत्तं विभीतकैः २७ कपालैः साध्वसो सतिमर्षिस्तैः पानुमुकला समिद्भि
र्गल्मिनेर्नाशो रिपूणामचिराद्भवेत् २८ किंभूरीणा दहाती ष्टदेवना समुपासिता पु
रश्चरणरा कास्मिन्कृते जन्मांतरार्पितः २९ मंत्रो यदि न सिद्ध्येत न दानं पुनराचरेत्॥
यद्वा समुद्रगामिन्यां नद्यामिंदुरविग्रहे ३० ॥ ॥ ॥

पैर्मयूरपिच्छैस्तेषामरीणां भयोसन्तिः २८ जन्मांतरोपार्जितपापबाहुल्यादिकपुरश्चरणेकृ
तेपरीष्टासिद्धिर्नभवेत्तर्हिपुनः पुरश्चरणं कुर्यात् २९ संक्षेपपुरश्चरणप्रकारमाह यद्वेति समु

तरं॰ शारदातिलकं ११
राम
२१७

विप्रान्संभोज्यहोमसमानसंख्यानेवेत्यर्थः तद्दशांशानस्युभयत्रापिसंबंधात तद्दशांशातो
जपदशांशेनजुहुयात् विप्रान्संभोज्यसिद्धिमाप्नुयादितिसंबंधः ३१ १३२ इतिश्रीमंत्र·

स्यदशांशोक्षांतमाजप्यजुहुयात्तद्दशांशतः विप्रान्संभोज्यनानान्नैर्मंत्राणांसि
द्धिमाप्नुयात् ३१ शाब्दज्ञपपरस्यापिसिद्ध्यंतिमनवोचिरात १३२ इतिश्रीमन्म
हीधरविरचितेमंत्रमहोदधौमंत्रशोधनंनामचतुर्विंशस्तरंगः २४ कर्म्माणिव
क्ष्योवक्ष्येसिद्धिदानिप्रयोगतः शांतिर्वश्यंस्तंभनंचद्वेषउच्चाटमारणे १ उक्ता
नीमानिकर्माणिशांतिरोगादि २ नाशनं वश्यंवचनकारित्वंस्तंभोवृत्तिनिरो
धनं २ द्वेषोप्रीतिःप्रीतिमतोरुच्चाटःस्थानतश्च्युतिः मारणंप्राणहरणंइतिषु
ट्कर्मलक्षणं ३ ॥ ॥ श्रीरामचंद्रायनमः॥ ॥ ॥

नौ· मंत्रशोधनंनामचतुर्विंशस्तरंगः २४ ध षट्कर्माणिवक्तुमुपक्रमते कर्म्मा
णीति शांतिरिति १ लक्षणमाह शांतिरोगादिनाशनमिति २ ३॥ ६२ ॥

तरं॰ २५

२९८

218

देवताएकोनविंशतिपदार्थान्प्रतिकर्मभिन्नान् यथास्वंज्ञात्वाषट्कर्माणिकुर्यादित्याह॥
देवतावर्णेत्यादिना ४५ उद्देशक्रमेणात्रादौदेवताआह रतिरितिशांत्यादिकर्मभिः
क्रमात्द्व्यादिपूज्यादेवतावर्णानाह सितेति रतिःसिता वाणीअरुणाइत्यादि ६ स्व

देवतादेवतावर्णान्ऋतुदिगदिवसासनं विन्यासामंडलंमुद्राक्षरंभूतोदयःस्म
तः ४ मालाग्निर्लेपनद्रव्यंकुंडंस्त्रुक्स्त्रुवलेखिनी षट्कर्माणिप्रयुंजीतज्ञा
त्वैतानियथातथं ५ रतिर्वाणीरमाज्येष्ठादुर्गाकालीचदेवताः सितारुणाहरिद्रा
भमिश्रश्यामलधूसराः ६ प्रपूजयेत्ताःकर्मादौस्ववर्णैःकुसुमैःक्रमात् ऋतुषट्कं
वसंताद्यमहोरात्रंभवेत्क्रमात् ७ एकैकस्यऋतोर्मानंघटिकादशकंमतं हेमं
तंचवसंताख्यंग्रीष्मंप्रावृट्शरत्तथा ८ शारदंकर्मणांषट्केयोजयेत्क्रमतःसुधीः
शिवसोमेंद्रनिरृतिपवनाग्निदिशःक्रमात् ९ ॥ ५० ॥ ५० ॥

वर्णैःसितादिवर्णैःऋतुनाह ऋतुषट्कमिति शांतौवसंतादीन्युंजीतप्रत्यहंस्र्येदियात्
नाडिदशकंवसंतः नदग्निमनाडीदशकंशिशिरइत्यादि दिशाआह शिवेति शिवदिगैशानी

राम

२९८

द्विसानाह शुक्लपक्षइति १० ११ १२ तदंतगाशुक्लप्रतिपत् १४ आसनान्याह पद्म
मिति पद्मस्वस्तिकउक्तो विकटलक्षणंयथा कृत्वोत्कटासनंपूर्वंसमपादद्वयंततः
अंतजानुकरद्वंद्वंकुकुटासनमीरितमितिऊर्वोःपादौक्रमान्न्यस्येज्जान्वोःप्रत्युङ्मुखौ

तत्तत्कर्माणिकुर्वीतजपंमन्त्रविद्दिशामुखः शुक्लपक्षेद्वितीयाचसप्तमीपंचमी
तथा १० तृतीयाबुधजीवाभ्यांयुताशांतिविधौमता चतुर्थीनवमीषष्ठीत्रयोद
शीतिथयस्तथा ११ जीवसोमसुताश्चैतावशीकरणकर्मणि एकादशीचनव
मीदशमीचाष्टमीतथा १२ शनैश्चरसितोपेताप्रोक्ताविद्वेषणेशुभा कृष्णेच
तुर्दशीषष्ठ्यौभानुसूनुयुतेयदि १३ उच्चाटनाख्यंकर्मात्रकर्तव्यंफलसिद्धये॥
भूताष्टम्यौकृष्णगतेअमावास्यातदंतगा १४ भानुमंदकुजोपेताश्चैभमारण
योः शुभा पद्मस्वस्तिकविकटकुकुटवज्रभद्रके १५ ॥ ६९ ॥

गुली करोनिदध्यादाख्यातंवज्रासनमनुत्तममिति सीवन्याःपार्श्वयोर्न्यस्येत्गुल्फयुगं
सुनिश्चलं वृषणाधःपादपार्ष्णीपाणिभ्यांपरिबंधयेत् भद्रासनंसमुद्दिष्टंयोगिभिःपूजितंप

रु॰ १८

तरं॰ २५ शरीरासनमुक्तोपवेशनार्थमासनमाह गोखड्गेति फेरुः शृगालः गवादीनां कृत्तोचर्म्मत्युपविश्यस्त्र
२१९ स्यादिविधेयः १६ १७ विन्यासानाह ग्रंथनमिति १८ ग्रंथनलक्षणमाह एकइति १९ विदर्भ

शांत्यादिषुप्रकुर्वीतक्रमादासनमुत्तमं गोखड्गगजफेरूणांमेषीमहिषयोस्तथा १६ कृत्तोनि
विश्यकुर्वीतत्तपं शांत्यादिकर्मसु आसनान्येवमुक्तीर्यविन्यासः प्रोच्यतेधुना १७ ग्रंथ
नंचविदर्भाख्यः संपुटोरोधनंतथा योगः पल्लवइत्येषट् विन्यासाः कर्मसुस्मृता १८ प्र
सेकमेषांषण्णांतुलक्षणंप्रणिगद्यते एकोमंत्रस्यवर्णाः स्यात्ततोनामाक्षरंपुनः १९ मंत्र
र्णोनामवर्णश्चेत्येवंग्रंथनमीरितं आदौमंत्राक्षरद्वंद्वमेकंनामाक्षरंततः २० एवंपुनः
पुनः प्रोक्तोविदर्भोमंत्रवित्तमैः मंत्रमादौसमुच्चार्यततोनामाखिलंपठेत् २१ ॥
॥ ॥ श्रीरामचंद्रायनमः॥ ॥श्रीरामजीः॥ ७ ॥ राम

लक्षणमाह आदाविति ग्रंथग्रंथनविदर्भयोर्मंत्रनामलेखनेऽन्यतरसमाप्तौपुनर्लेखन २० २१९
संपुटलक्षणमाह मंत्रमिति २१ ॥ ॥ ॥ ॥

219

धनमाह आदीति २२ योगमाह नामेति पल्लवमाह मंत्रांतइति मंडलमाह अर्द्धचंद्रेति २३ २४
नद्वृत्तं बिंदुषट्कांकितं वायुमंडलं उच्चाटनेयुक्तममिति २५ मुद्रामाह सरोरुहमिति सरोरुहंप
द्ममुद्रासायथा करौद्वौसमुखौकृत्वासंहतावुन्नतोपुनः अंगुलीः प्रसृतामध्येगुष्टोपद्मस्यमु

अंतेव्युत्क्रममतोमंत्रमेषसंपुटईरितः आदिमध्यावसानेषुनाम्नोमंत्रस्करोधनं २२
नामांतेतुमनुर्योगोमंत्रांतेनामपल्लवः अर्द्धचंद्रनिभंपार्श्वद्वयेपद्मद्वयांकितं २३ ज
लस्यमंडलंप्रोक्तंप्रशस्तंशांतिकर्मणि त्रिकोणंस्वस्तिकोपेतंवस्येवह्नेस्तुमंडलं २
४ चतुरस्रंवज्रयुक्तंस्तंभेभूमंडलंस्मृतं वृत्तंद्विवस्त्रद्विद्वेषेबिंदुषट्कांकितंतुनत २५
॥वायुमंडलमुच्चाटेमारणेवह्निमंडलः॥

द्रिकेति पाशमुद्रायथा तर्जनीमध्यमेवामेऊर्ध्वमुख्योविधायच दक्षिणेहेअधोमुखेसंमु
खेतुपरस्परं पाशमुद्राभवेदेषामिथःसंपीडनेतयोरिति॥ ६७ ॥ ६७ ॥ ६७ ॥

तरं० २५

२२०

गदामुद्रा यथा अन्योन्याभिमुखौ कृत्वा हस्तौ तु ग्रथितावुभौ अंगुल्यौ मध्यमे तद्वत्संयुते सुप्रसारि
ते गदामुद्रेयमुदिता दर्शिता विघ्नहारिणीति मुशलमुद्रा उक्ता कुलिशं वज्रमुद्रा सा यथा क
निष्ठांगुष्ठयुग्मुद्रा त्रिकोणा त्वग्रानेर्मतेति अग्रानेः वज्रस्य कनिष्ठांगुष्ठयोगाग्रस्य पुरःप्रसार
णात्त्रिकोणाग्रस्येत्यर्थः असिखड्गमुद्रा यथा ऊर्ध्वस्य वामहस्तस्य तर्जन्याद्यंगुलित्रयं प्रसार्यसो

सरोरुहं पाशगदे मुशलं कुलिशं त्वसि २६ पञ्चमुद्राः कर्मषट्के सुरयोहोमे निगद्यते मृ
गीहंसी सूकरीति होममुद्रा त्रयं स्मृता २७ मध्यमानामिकांगुष्ठयोगे मुद्रा मृगी मता
हंसी कनिष्ठाहीनानां सर्वासां योजने मता २८ सूकरी करसंकोचे मुद्रालक्षणमीरितं॥
शांतौ वश्ये मृगी हंसी स्तंभनादिषु सूकरी २९ चंद्रतोयधराकाशपवनानलवर्णकाः ष
ट्सु कर्मसु यन्त्रस्थबीजान्युक्तानि सूरिभिः ३०॥ ॥ ॥

जयेदन्ये मीथोंगुष्ठकनिष्ठके खड्गमुद्रेयमुदिता सर्वशत्रुनिकृंतनीति २६ होममुद्रा आह॥
मृगीति २७ तासां लक्षणमाह मध्यमेति २८ ९ वर्णानाह चंद्रेति शांतौ चंद्रवर्णायंत्रे जी
वलेनलेख्याः वशीकरणादौ जलादिवर्णाः ३०॥ ७ ॥ श्रीरामचंद्राय नमः॥ ७ ॥

राम

२२०

२२०

चंद्रवर्णानाह स्वराइति षोडशस्वराः सठएतेअष्टाक्षराचंद्रवर्णाः पंच भूतवर्णास्तु पूर्वोक्तिनरंगेस्वकुला
न्यकुलभेदेउक्ताः तत्रयद्यपिचंद्रवर्णाअपिसंति तथापिवश्यादौतोयादिवर्णलिखनेचंद्रवर्णरहि

स्वराःसटौचंद्रवर्णाभूतवर्णाउदीरिताः चंद्राणहीनास्तेग्राह्यावशीकृत्यादिकर्मसु ३१ ॥
केचित्सबलहान्यरमाहुश्चंद्रादिवर्णकान् शांत्यादिकर्मसुज्ञेयाजातयःषडमूःक्रमात् ३२
नमःस्वाहास्वधावौषट्हुंफडमंत्रविन्नमैः नासापुटद्वयाधस्ताद्यदाप्राणगतिर्भवेत् ३३
तोयोदयस्तदाज्ञेयःशांतिकर्माणिसिद्धिदः पुटोपरिष्टाद्गमनप्राणेस्यात्सावक्रोदयः ३४
तदाकर्मद्वयेसिद्धिर्मारणेचवशीकृतौ नासारंध्राश्रितगतौप्राणेस्तंभेधरोदयः ३५

तानाभेवजलादिवर्णानांलेखनं ३१ केषांचिन्मतेसबलहपराक्रमाश्चंद्रतोयभूनभोनिलानलव
र्णाः ३२ ३४ उपरिप्राणगमनेअग्न्युदयः ३४ नासामध्यदंडाश्रितगमनेधरोदयः॥ ७॥
संस्तंभनेज्ञेयः ३५ ॥ ॥ ७ ॥ श्रीरामचंद्रायनमः॥ ॥ ७ ॥

तरं: २५ नासाविवरमध्यगतेप्राणेतन्मध्येप्राणगतोव्योमोदयः तिर्यग्गतोप्राणेवायूदयः ३६ समिधश्चा

२२१ ह दूर्वयाइति दाडिमेति वश्यार्थंहोमेऽजाघृताक्ताः दाडिमसमिधः स्तंभनेमेषीघृताक्ताराजवृक्षस

पुटमध्यगतोनास्मिन्द्वेषेव्योमोदयः शुभः प्राणेतिर्यग्गतोज्ञेयोउच्चाटेमारुतोदयः ३६

दूर्वायाः समिधः शांतौगोधृतेनसमन्विताः दाडिमप्रभवाहोमेवश्येजाघृतसंयुताः ३७

मेषीघृताक्तासमिधः स्तंभेराजतरूद्भवाः धत्तूरसमिधोद्वेषेतसीतैलेनसंयुताः ३८

चूतजाः कटुतैलाक्ताउच्चाटनविधौशुभाः कटुतैलयुताः त्रासमारणेखदिरोद्भवाः ३९

शंखजापद्मबीजोत्थानिंबारिष्टफलोद्भवा प्रेतदंतभवावाहरदोत्थाखरदंतजाः ४०

राम

मिधः ३७ ८ आम्रसमिधः ३९ मालामाह शंखजेति स्तंभनेनिंबफलजा अरिष्टःफेनिलः २२१

तफलजावामालाविधेयाउच्चाटनेवाहरदोत्था अश्वदंतोत्था ४० ॥ ५ ॥ ५ ॥

मालायांगणनप्रकारमाह मध्यमायामिति ज्येष्ठेनागुष्ठेनावर्तयेत्भ्रमयेत ४१ २ ३ मालाम णिसंख्यामाह अष्टोत्तरशतमिति तदर्धंचतुःपंचाशत तदर्द्धंसकंप्तविंशतिः एषात्रिधामाला

जपमालाक्रमात्ज्ञेयाःशांतिमुख्येषुकर्मसु मध्यमायांस्थितांमालांज्येष्ठेनावर्तयेत्सु धी ४१ शांतौवश्येतथापुष्टौभोगमोक्षार्थकेजपे अनामांगुष्टयोगेनजपेत्स्तंभनक र्मणि ४२ तर्जन्यंगुष्ठयोगेनद्वेषोच्चाटनयोर्जपे कनिष्ठांगुष्ठयोगेनमारणेप्रजपेत्सु धीः ४३ अष्टोत्तरशतंसंख्यातदर्द्धंचतदर्द्धकं मणीनांशुभकार्येस्यात्तिथिसंख्याभि चारके ४४ शांतिर्वश्यंलौकिकाग्नौस्तंभनेवटजेनले द्वेषःकलितरुसन्नेशेषेपित्र वनास्थिते ४५ ॥ ॥श्रीरामचंद्रायनमः॥ ॥ ॥

शुभकार्ये अभिचारेस्तंभनादौपंचदशमणियुक् ४४ कलितरुर्द्रवोबिभीतजाले शेषेउ च्चाटनमारणकर्मणिस्मशानवह्नौहोमः ४५ ॥ ॥श्रीरामजीः॥ ७ ॥

नरं॰ २५ वह्निप्रसंगात्काष्ठान्याह शुभइति शुभेशांतिपुष्ट्यादौकर्मणिबिल्वादिकाष्ठैरग्निंप्रज्वालयेत्
२२२ अशुभेस्तंभनादौविषवृक्षादिकाष्ठैः विषवृक्षःकोचिलाइतिप्रसिद्धः अक्षोबिभीतकः केम =

222

शुभेकर्मणिबिल्वार्कपालाशक्षीरवृक्षजैः अशुभेविषवृक्षाक्षनिंबधंतरकेसुलैः ४६
काष्ठैःप्रदीपयेदग्निंहोमकर्मणिमंत्रवित् वह्नेर्जिह्वांसुप्रभाख्यांशांतिकर्मणिपूजये
त् ४१ वश्यकार्येहिरक्ताख्यांस्तंभनेकनकाभिधां ४७ विद्वेषेगगनांजिह्वांमुच्चा
टेप्यतिरक्तकां कृष्णांतुमारणेचार्चेद्बहुरूपांतुसर्वतः ४८ भोज्यसंख्याविशेषा
पिज्ञेयःशांत्यादिकर्मसु शांतौवश्येभोजयेत्होमाद्विप्रान्दशांशतः ४९ उत्तमं
तद्भवेत्कर्मतत्तांशेनतुमध्यमं होमाच्छतांशतोविप्रभोजनंत्वधमंस्मृतं ५० ॥

शांत्यादिकर्मसुब्राह्मणभोजनसंख्यानिरूपणम् ४८ ५०

एम

तः श्लेष्मांतकः ४६ अग्निप्रसंगादेतत्कर्मविशेषेवह्निजिह्वापूजामाह वह्नेरिति कनकाभिधां
कनकंहिरण्यं ४७ ८ होमप्रसंगात् विप्रभोजनसंख्यामाह भोज्येइति शांतिवश्ययोर्होमाद्दशां

२२२

विप्ररूपमाह अतिम्पुद्ध इति ५२ ५३ उक्तविप्रभोजनेअभिचारोत्थमेनः पापंनश्यति तस्मा
दुत्तमाद्विजाभोज्याः ५४ लेखनद्रव्यमाह चंदनामिति रात्रिर्हरिद्रातासां लेखनद्रव्यं

मंत्रांतेद्विगुणितंविप्रभोजनंस्तंभनेस्मृतं त्रिगुणंद्वेषणोच्चाटेमारणेहोमसंमितं
५१ अतिम्पुद्धकुलोत्पन्नाः सांगवेदविदोमलाः सदाचाररताविप्रा भोज्याभोज्ये
र्मनोहरैः ५२ पूज्यास्तेदेवताबुध्यानमस्कार्यापुनः पुनः संतोष्यामधुरैर्वाक्यै
र्हिरण्यादिप्रदानतः ५३ अचिरात्स्तंभनेभीष्टंगृहीतायांतदाशिषि एनोभिचार
कर्मोत्थंनश्यंतिद्विजवाक्यतः ५४ चंदनंरोचनारात्रिर्गृहधूमाश्रिताभवः अंगारा
ष्टविषाणीतिज्ञात्यादौयंत्रलेखने ५५ पूर्वोक्तिलेखनंद्रव्यंगृह्णीयात्तदपिध्रुवं म
रीचंपीप्पलीशुंठीश्येनविष्टाचचित्रकः ५६ गेहधूमोन्मत्तरसौलवणंचविषाष्टकं
ग्रांतोवश्यालिखिद्भूर्जेस्तंभनेद्विपिचर्मणि ५७ ॥ ६८ ॥ ६७ ॥

अष्टविषाणियथा पूर्वोक्तंयंत्रतरंगोक्तंलेखनद्रव्यंतत्तत्कामनयाग्राह्यं अष्टविषाण्याह
मरीचमिति ५५ ५६ लेखनद्रव्यप्रसंगाल्लेखनाधारमाह ग्रांतावितिति ५७ ॥ ६७ ॥

तरं॰ २५ २२३

५८ कुंडान्याह शांतौवृत्तंकुंडंपाश्चिमायां पद्माकारंवश्यउत्तरे स्तंभनेचतुरस्रंपूर्वे द्वेषेत्रि कोणंनैऋत्यां उच्चाटनेषट्कोवायव्यां मारणेऽर्द्धचंद्राकारंदक्षिणेइत्यर्थः ५९ ६० ॥५॥

खरचर्मणिविद्वेषेउच्चाटेध्वजवाससि नरास्थिनिलिखेद्यंत्रंमारणेमंत्रवित्तमः ५८
येचाधाराःस्मृतायंत्रतरंगेतेपिसंमताः वृत्तंपद्मंचतुष्कोणंत्रिषट्कोणंदलंदुवृत्त
५९ तोयेन्द्रासोमशक्राणांयातुवायोर्यमस्यच आशासुक्रमतःकुंडंशांतिमुखेषु
कर्मसु ६० सौवर्णौयज्ञवृक्षोत्थौस्रुक्स्रुवौशांतिवश्ययोः स्तंभनादिषुकार्येषु
स्मृतौलोहमयौहितौ ६१ हेमजारूप्यजाताम्रसंभवालेखिनीशुभे वश्येद्वि
वेकुशसंज्ञाः स्तंभनेऽगस्त्यवृक्षजा ६२ राजवृक्षभवावास्याद्विद्वेषेतुकरंजजा रामे
बिभीतकाश्रितोच्चाटेमारणेतुपुमास्थिजा ६३ शुभेकर्मणिरम्याहेलाखिनीस्वयं
सुधीः रिक्ततिथौकुजदिनेविष्टौतामशुभेपुनः ६४॥ ५ ॥ ५ ॥

२२३

स्रुक्स्रुवावाह सौवर्णाविति ६१ लेखिनीमाह हेमजेति रामेशांतौ ६२ ६४ ॥

२२३

देवताद्येकोनविंशतिवस्तूनित्रांस्यादीनिरूप्यपुनरधिकंवस्तुप्रतिजानितेभक्ष्यमितिपरमान्नंप

भक्ष्यंचतर्पणद्रव्यंतत्पात्रमभिधीयते शांतौवश्येहविष्यान्नंस्तंभनेपरमान्नकं ६५ माष
मुद्गाश्चविद्वेषेगोधूमान्नंत्रानेस्थलात मसूरान्नंतथाकृष्णमाकृप्रजादुग्धोत्थयसं ६६ मारणे
प्रोदितंभक्ष्यंमंत्रिणांकर्मकुर्वतां शांतौवश्येहरिद्राक्तांजलंतर्पणईरितं ६७ मरीचाद्यंक
वोष्णंतस्तंभनेमारणेतथामेषरक्तान्वितंतोयंविद्वेषोच्चाटयोर्मतं ६८ स्वर्णपात्रंतर्पणे
स्यात्शांतौवश्येचकर्मणि स्तंभनेमृत्तिकापात्रंविद्वेषेखदिरोद्भवं ६९ लोहनिर्मितमु
च्चाटेकुक्कुटांडंचमारणे महासनेसमासीनःशांतौवश्येप्रतर्पयेत् ७० जानुभ्यामुत्थि
तःस्तंभेद्वेषादावेकपात्स्थितः षट्कर्मणांविधिःप्रोक्तएवंमंत्रज्ञतुष्टये ७१ सम्यक्कृ
त्वान्यासजालमात्मरक्षांविधायच कार्यंकर्मप्रकर्तव्यमन्यथाभिभवोभवेत् ७२ ॥

यसं ६ ५ स्थलातभंगोउच्चाटने ६६ ७२ ॥ ॥ ॥

तरं॰ २५
२२४

एवंकाम्यकर्मनिरूप्यतत्रासक्तिंवारयति शुभंवेति ७३ एवंचेत्किमेवमित्युक्तंतदित्यत्राह विष
येति पूर्वाचार्योक्तित्वादुक्तं तदत्युत्पत्याहितंनभवति ७४ तत्रहेतुमाह काम्येति ७५ ७६ निष्का
मभजनेफलमाह वेदेति कर्मोपासनबोधनं कर्मकांडं ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादि उपा

२२५

शुभंवाप्यशुभंवापिकाम्यंकर्मकरोतियः तस्यारित्वंभजेन्मंत्रोनतस्मात्तत्परोभवेत् ७३
विषयासक्तचित्तानांसंतोपायप्रकाशितं पूर्वाचार्योदितंकाम्यंकर्मनैतद्धितावहं ७४
काम्यकर्मप्रसक्तानांनानावत्मात्तंभवेत्फलं निष्कामंभजनादेवमखिलाभीष्टसिद्धयः ७५
प्रतिमंत्रंसमुदितायेप्रयोगासुखाप्तये तदासक्तिंविहायैवनिःकामोदेवतांभजेत् ७६
वेदेकांडत्रयोप्रोक्तंकर्मोपासनबोधनं साधनंकांडयुग्मोक्तंतृतीयेसाध्यमीरितं ७७

राम

सनकांडं सूर्योब्रह्मेत्युपासीत योहैवेज्येष्ठंचश्रेष्ठंचवेदेत्यादि इदंकांडद्वयंसाधनंज्ञानस्य तृती
यज्ञानकांडं अयमात्माब्रह्मेत्यादि तत्साध्यंफलभूतं तस्मात्तज्ज्ञानप्राप्तयेप्रयतितव्यमित्यर्थः

२२४

तत्रोपायमाह तस्मादितिनिःकामंवेदोक्ताचरणेदेवतोपासनेचांतःकरणशुद्धिःततोज्ञानप्राप्तिरि
त्यर्थः ७८ ज्ञानस्वरूपमाह कार्येति कार्याणिइंद्रियाणिकारणानिभूतानितत्संघातःशरीरंतच्चा
लकश्चेतनोजीवःवस्तुतोब्रह्मैवेतिसाक्षात्कारोज्ञानं तत्त्वमसिश्वेतकेतो अहंब्रह्मास्मीत्यादिश्रु

तस्माद्वेदोदितंकुर्यादुपासीतचदेवता शुद्धांतःकरणस्तेनलभतेज्ञानमुत्तमं ७८ कार्य
कारणसंघातप्रविष्टश्चेतनात्मकः जीवोब्रह्मैवसंपूर्णमितिज्ञात्वाविमुच्यते ७९ मनु
ष्यदेहंसंप्राप्यउपासीतश्चदेवताः यत्नोमुच्येतसंसारान्महापापयुतोहिसः ८०
आत्माज्ञानाक्षयेतस्माद्यतितव्यंनरोत्तमैः कर्मभिर्देवसेवाभिःकामाद्यरिगणक्षयात् ८१

तेः ७९ ज्ञानायाप्रयतमानंनिंदति मनुष्येति ८० फलितमाह आत्मज्ञानेति कामक्रोधलोभा
श्रयः तेषांक्षयंकृत्वाकृतैःकर्मभिः वैदिकैःदेवतोपासिता श्वाभितःकरणशुद्धिद्वाराज्ञाना
प्तिरित्यर्थः ८१ ॥ ॥ श्रीरामचंद्रायनमः॥ ॥ ॥

त॰ २५

२२५

देवतोपास्तिंकुर्वताभविष्यद्विचार्यप्रवर्तितव्यमित्याहचिकीर्षिति ८२ तमंतरेणतंगुरुंविनाशु

भाशुभंस्वप्नंस्वयमेवविचारयेत ८७ तत्रशुभस्वप्नानाह लिंगमिति ८८ शिखीति मयू

चिकीर्षुर्देवतोपास्तिमादौभाविविचारयेत स्नानसंध्यादिकंकृत्वास्मृत्वाहरिपदांबुजं

८२ शतकृत्वाशय्यायांप्रार्थयेतवृषभध्वजं ॐभगवन्देवदेवेशशूलभृद्वृषवाहन

८३ इष्टानिष्टेसमाचक्ष्वममसुप्तस्यशाश्वत नमोजायत्रिनेत्रायपिंगलायमहात्मने

८४ वामायविश्वरूपायस्वप्नाधिपतयेनमस्स्वप्नेकथयमेतत्त्वंसर्वकार्येष्वशेषतः ८५

क्रियासिद्धिंविधास्यामित्वत्प्रसादान्महेश्वरं एभिर्मंत्रैःशिवंप्रार्थ्यकुर्यान्निद्रांनिराकु

लं ८६ स्वप्नदृष्टंनिशिप्रातर्गुरवेविनिवेदयेत तमंतरेणमंत्रज्ञःस्वयंस्वप्नंविचारयेत

एम

८७ लिंगंचंद्रार्कयोर्बिंबंभारतीजाह्नवीगुरुः रत्नाब्धितरणंयुद्धेमथोनलसमर्चनं ८८

शिखीहंसरथांगाद्यैरथेस्थानंचमोहनं आरोहणंसारसस्यधराला भश्चनिम्नगाः ८९

२२५

रयुक्तेहंसयुक्तेचक्रयुक्तेवारथेस्थितिः मोहनंसुरतं निम्नगादीनामारोहणं ८९ ॥ ५२ ॥

राज्याभिषेकोराज्याप्तिः गवादीनादर्शनमेवशुभं ९२ एतानिलिंगादिदर्पणानानिशुभानि ९३ अशु

प्रासादः स्यंदनः पद्मंछत्रंकन्याद्रुमः फली नागोदीपोहयः पुष्पंवृषभोब्धिश्चपर्वतः ९०
सुरालयंग्रहास्ताराणारीसूर्योदयोप्सराः हर्म्यशैलविमानानामारोहोगगनेगमः ९१ मद्य
मांसादनंविष्टालेपोरुधिरसेवनं दध्योदनादनंराज्याभिषेकोगोद्विजध्वजाः ९२ सिंहःसिं
हासनंशंखोवादित्रंरोचनादधि चंदनंदर्पणंश्वेपांखप्रेसंस्पर्शनंशुभं ९३ तैलाभ्यक्तकृष्ण
वर्णोनि ग्रोनागर्त्तवायसौ शुष्कंकंटकिवृक्षश्चचंडालोदीर्घकंदरः ९४ प्रासादस्तलहीन
श्चनेतेस्वप्नेशुभावहाः शांतिंकुर्वीतदुःस्वप्नेजपेन्मंत्रमनन्यधीः ९५ अष्टात्रिंकंजपंतस्यकुर्व
तोविघ्नसंभवः विघ्नसंघमनाद्दत्स्यपदाजपपरोभवेत् ९६॥ ॥ ॥

भस्वप्नानाह तैलेति तैलाभ्यक्तोनापुरुषः तदादिनादर्शनंअशुभं ९४ ९५ ९६

॥ ॥ श्रीरामचंद्रायनमः॥ ॥ श्रीरामजीः॥ ॥

नरं· २५
२२६
226

मंत्रसिद्धिलक्षणमाह मनप्रसादइति ९७ ९८ ९९ १०० आत्मसाक्षात्कारपर्यंतंमंत्रोपा निरिसा

सिद्धोविश्वस्तचित्तः संस्तुरीयेक्ष्मासिद्धिभाक् मनःप्रसादःसंतोषःश्रवणंदुंदुभिध्वनेः ९७
गीतस्यतलतालस्यगंधर्वाणांसमीक्षणं स्वतेजसःसूर्यसाम्येक्षणंनिद्राक्षुधाजयः ९८
रम्यतारोग्यगांभीर्यमभावक्रोधलोभयोः एवमादीनिचिह्नानियदापश्यतिमंत्रवित् ९९
सिद्धिंमंत्रस्यजानीयाद्देवतायाःप्रसन्नतां ततोजपेधिकंयत्नंप्रकुर्यात्ज्ञानलब्धये १००
लब्धज्ञानः कृतार्थःस्यात्संसारात्परिमुच्यते ज्ञात्वात्मानंपरंब्रह्मवेदांतैःप्रतिपादितं १०१

राम

ह लब्धज्ञानइति अहंब्रह्मेतिसाक्षात्कारोज्ञानमित्यर्थः १०१ ॥ ५९ ॥ ५९ ॥

२२६

ग्रंथसमाप्तौमंगलमाचरति तंवंदेइति अनेनैवनादेवतारूपेणजनैःसेव्यतइत्यर्थः योयोयांयांत
नुंभक्तःश्रद्धयार्चितुमिच्छति तस्यातस्याचलांश्रद्धांतामेवविदधाम्यहं सतयाश्रद्धयायुक्तस्तस्या
राधनमीहते लभतेततःकामानमयैवविहितानहितान इतिभगवद्वचनात २ ग्रंथकर

तंवंदेपरमानंदंसर्वव्यापिनमीश्वरं योनानादेवतारूपोनृणामिष्टंप्रयच्छति २ विलोकना
नातंत्राणिप्रार्थितोद्विजसत्तमैः स्वमतेरनुसारेणाकार्षंमंत्रमहोदधिं ३ बाणनेत्रमितास्त
स्मिंस्तरंगाःसंतिनिर्मिताः तत्रानुक्रमणींवक्ष्येमंत्राणांसुखबुद्धये ४ भूतशुद्धिस्तथाप्रा
णप्रतिष्ठान्यसनंलिपेः पुरश्चर्याहोमविधिस्तर्पणाद्यादवीरितं ५ द्वितीयोर्मौगणेश
स्यमंत्राःसम्यक्मीरिताः कालीकालीभिधानानासुमुखीतितृतीयके ६॥ ७॥

णोहेतुमाह विलोक्येति ब्राह्मणप्रार्थनमेवहेतुः ३ बाणनेत्रमितापंचविंशतिः ४ अनुक्र
ममाह भूतशुद्धिरिति लिपेःमातृकायाः न्यसनंन्यास॥ ५ ॥ ५ ॥ ५ ॥

तं॰ २५ २२७

सः आद्येप्रथमतरंगेणनद्दीरितं ५ द्वितीयोमौ द्वितीयतरंगेगणेशमंत्राः काल्यादितृतीये ६ षे
ष्ठे ७ बंधनहारिणीतिबंदीविशेषणं छिन्नमस्तापष्टे ८ वाराहीवार्तालीदयक्षण्यादिकथन

२२७

तारातुरीयेसंप्रोक्तानारभेदास्तुपंचमे षष्ठेतरंगेगदिताछिन्नमस्ताशबर्यपि ७ स्वय
वरामधुमतीप्रमदाचप्रमोदया बंदीबंधनहारीतिसप्तमेवट्यक्षिणी ८ तस्याभेदाश्चवा
राहीज्येष्ठाकर्णपिशाचिनी स्वप्नेश्वरीचमातंगीबालेशीमदनेश्वरी ९ अष्टमेविस्त
राप्रोक्ताबालाबालाभिदाअपि नवमेतन्नपूर्णोक्तातद्भेदामोहनादिजा १० ज्येष्ठल
क्ष्मीरलमंत्रउक्ताप्रत्यंगिरारिहा दशमेबगलावक्त्रावाराहीहितयंतथा ११॥ ६९॥

राम

मेत्र्यंतंसप्तमे ९ मोहनादिजामोहनगौरी १० अरिहाशत्रुनाशकः षोडशार्णः बगला
वक्त्राबगलामुखी ११॥ ॥श्रीरामचंद्रायनमः॥ ॥ ६९ ॥

२२७

नदावृत्तिः श्रीविघ्यागमावर्णपूजा १२ मुनिः वेदव्यासः १३ १४ चरणायुधः कुक्कुटमं

श्रीविधेकादशेप्रोक्ताद्वादशेतुतदावृत्तिः त्रयोदशेतुहनुमानविस्तरात्प्रतिमादितः।
१२ चतुर्दशेनारसिंहोगोपालोगरुडोपिच अथपंचदशेसूर्यभौमोजीवःसितोमुनिः
१३ षोडशेसोमहामृत्युंजयोरुद्रोधनेश्वरः जाह्नवीमणिकर्णीतिप्रोक्तःसप्तदशेऽ
र्जुनः १४ अष्टादशेकालरात्रिश्चंडिकायानवाक्षरः एकोनविंशेचरणायुधःअ
स्त्रसमन्वितः १५ पार्थिवाख्यनकीनाशाविचित्रगुप्तासुरीविधिः विंशेतरंगेयंत्रा
णिस्वर्णाकर्षणभैरवः १६ स्नानादिरंतर्यागांतएकविंशेर्चनेविधिः द्वा
विंशेर्घसमारभ्यपूजनंतद्भिदाअपि १७ त्रयोविंशेतुदमनेःपवित्रेश्चसमर्च
नं चतुर्विंशेचक्रभेदैर्मंत्राणांपरिशोधनं १८॥ ६५ ॥ ६५ ॥

नः १५ कीनाशोयमः १६ मद्भिदाः पूजाभेदाः १७ १८॥ श्रीरामजीः॥

तरं॰ २५
२२८

चरंमेविंशेतरंगेत्रांस्यादिकर्मषट्कमनुक्रमाणिकाचेति १९ २० स्ववंशमाह अ

तरंगेचरमेप्रोक्तंकर्मषट्कमनुक्रमः एवंमंत्रोदधावस्मिनपंचविंशतिरूर्मयः १९
विशोधनीयाविद्वद्भिः क्षंतव्यंसाहसंमम चापलंनिजबालानांक्षमतेजनकोः
यथा २० अहिछत्रेद्विजछत्रवत्सगोत्रसमुद्भवः आसीत्कलाकरोनामविद्या
नख्यातोधरातले २१ तत्रनूजोरामभक्तः कंभट्टाभिधोभवत् महीधरस्त
दुसन्नः संसारासारतांविदन् २२ निजदेशंपरित्यज्यगतोवाराणसींपुरीं सेवमा
नोनरहरिंतत्रग्रंथमिमंव्यधात् २३ कल्याणाभिधपुत्रेणतथान्यैर्द्विजसत्त
मैः अनेकानागमग्रंथानविलोकितुमुनीश्वरः २४॥ ५ ॥ ५ ॥

एम

२२८

हिछत्रेति २१ २२ २३४ २५॥ श्रीरामचंद्रायनमः॥ ॥

२५ ग्रंथांतेआशिषमाह अविछिन्नेति श्लोकत्रयेणदेवतांप्रार्थयेत २६ २७ नरसिं
हइति नरसिंहोनरसिंहोमेमुदेहर्षायास्तु देवानांचारेणसमूहेननुतनः २८ नृसिंहोमां

एकग्रंथगतंसर्वमंत्राणांसारमिप्सुभिः संप्रार्थितःस्वमत्यासोचक्रेमंत्रमहोदधि
२५ अविछिन्नान्वयाःसंतुनिजधर्मपरायणाः मंगलानिप्रपश्यंतुसर्वद्रोहपरा
ङ्मुखाः २६ हरिःकरोतुकल्याणंसर्वेषांजगदीश्वरः प्रवर्तयतिमंग्रंथंयावद्देहे
रविःशशी २७ नरसिंहोमहादेवोमहादेवार्तिनाशनः मुदेवरोमहालक्ष्म्यादेववारनु
तोस्तुमे २८ नृसिंहनुमंगसमुद्रजोमांसमुद्रजनद्वीपगृहेनिषण्णः समुद्रजोहीनम
तिःसदाव्यात्समुद्रभक्ताखिलसिद्धदायी २९॥ ॥ ॥ ॥

सदाव्यात्कीदृशः अंगेसमुद्रजालक्ष्मीर्यस्यसः समुद्रेजातंयच्छे तद्वीपंतत्रयत्गृ
हंतत्रोपविष्टः समुत्सहर्षः रजोहीनमतिः॥ ॥ ॥ ॥

नरं: २५
२२९

विरजाः समुद्राग्रं जल्यादिमुद्राविशेयेभक्तास्तेषां सर्वसिद्धिदायीशाना २९ विभक्तिसम्प्रकेन
हरिंस्तौति राजालक्ष्मीनृसिंहइति नृहरिणामहांतोदैत्याधीशाग्रहसतहताः हंतेलुंड

राजालक्ष्मीनृसिंहोजयातिसुखकरंश्रीनृसिंहंभजेहं दैत्याधीशोमहांतोहसतन
हरिणाश्रीनृसिंहायनोमि सेव्यालक्ष्मीनृसिंहादपरइहनहिश्रीनृसिंहस्यपादो
सेवेलक्ष्मीनृसिंहेवसतुममनःश्रीनृसिंहावभक्त ३० विघ्नेशोगिरिजाविंदुमाध
वोमाणिकर्णिका भैरवोजाह्नवीदंडपाणिर्मेनिन्वतांशिवं १३१॥ छ ॥
॥ छ ॥ श्रीरामजीसंमर्थः॥ ॥श्रीरामजीसंमर्थः॥ छ ॥ राम

229

कर्मणिचरणनदिडभावेरूपं श्रीनृसिंहायश्रीनृसिंहंप्रसादयितुंनोमिस्तौमि क्रियार्थो
पपदस्यस्वकर्मणिस्थानिनइतिचतुर्थीश्रीनृसिंहभक्तःप्रवरस्स ३० ३१ ग्रंथनिष्पत्तिकाल

२२९

विक्रमार्कादिति बाणवेदनृपैर्मिते वर्षे पंचचत्वारिंशदुत्तरषोडशशततमे विक्रमनृपात्तु गते समिति शिव
रामेश्वरस्याग्रे मंत्रमहोदधिसमाप्तिमगात् १३२ इति श्रीमन्महीधरविरचितायां मंत्रमहोदधिटीका
यां नौकाख्यायां षट्कर्मादिनिरूपणं नाम पंचविंशस्तरंगः २५ वर्षे सायकवेदभूपतिमिते श्री
विक्रमार्कांकिते माघे मासि सिते क्षेनलतिथौ वारे रवेर्नंदने श्रीमद्वत्सकुलोद्भवो महीधरः श्रीतीर्थराजे

विक्रमार्कांकिते वर्षे बाणवेदनृपैर्मिते ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मंत्रमहोदधिः १३२ इति
श्रीमन्महीधरकृते मंत्रमहोदधौ षट्कर्मादिनिरूपणं नाम पंचविंशस्तरंगः २५ ॥ श्रीः
॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥

व्यधात्स्वीये मंत्रमहोदधौ गुणयुतां नावं विदां तुष्टये १ मूलं ढुंढेश्वरो गंगामाधवो भानुनंदनः सरस्व
तीच सोमेशो ददतां मे निशं शिवं २ श्रीविश्वनाथो गिरिजा गणेशः श्रीमाधवो भैरवदंडपाणिः ल
क्ष्मीनृसिंहो मणिकर्णिकार्कः काशीशदुर्गा ददतां शिवं मे ३ समाप्तोयं ग्रंथः ॥ ॥ श्रीः

नं. २५

२३०

230

॥ छ ॥ इति श्री मंत्रमहोदधौ समाप्तः ॥ छ ॥

राम

२३०